पडिक्कमामि भंते ! वद पडिमाए पढमे सिक्खावदेः- फासिंदिय भोगपरिमाणाइक्कमणेण वा, रसणिंदियभोग परिमाणाइक्कमणेण वा, घाणिंदिय भोग परिमाणाइक्कमणेण वा, चक्खिंदिय भोग परिमाणाइक्कमणेण वा, सवणिंदिय भोग परिमाणाइक्कमणेण वा, जो मए देवसिओ (राइयो) अइचारो, अणाचारो, मणसा, वचसा, काएण, कदो वा, कारिदो वा, कीरंतो वा, समणुमण्णिदो, तस्स मिच्छा मे दुक्कडं ॥२-९-१ ॥

पडिक्कमामि भंते ! वद पडिमाए विदिए सिक्खावदेः- फासिंदिय परिभोग परिमाणाइक्कमणेण वा, रसणिंदिय परिभोग परिमाणाइक्कमणेण वा, घाणिंदिय परिभोग परिमाणाइक्मणेण वा, चक्खिंदिय परिभोग परिमाणाइक्मणेण वा, सवणिंदिय परिभोग परिमाणाइक्मणेण वा, जो मए देवसिओ (राइयो) अइचारो, अणाचारो, मणसा, वचसा, काएण, कदो वा, कारिदो वा, कीरंतो वा, समणुमण्णिदो, तस्स मिच्छा मे दुक्कडं ॥२-१०-२ ॥

पडिक्कमामि भंते ! वद पडिमाए तिदिए सिक्खावदेः- सचित्त णिक्खेवेण वा, सचित्त-पिहाणेण वा, परव्यएसेण

वा, कालाइक्कमणेण वा, मच्छरिएण वा, जो मए देवसिओ (राइयो) अइचारो, अणाचारो, मणसा, वचसा, काएण, कदो वा, कारिदो वा, कीरंतो वा, समणुमण्णिदो, तस्स मिच्छा मे दुक्कडं ॥२-११-३॥

पडिक्कमामि भंते ! वद पडिमाए चउत्थे सिक्खावदेः- जीविदासंसणेण वा, मरणासंसणेण वा, मित्ताणुराएण वा, सुहाणुबंधेण वा, णिदाणेण वा, जो मए देवसिओ (राइयो) अइचारो, अणाचारो, मणसा, वचसा, काएण, कदो वा, कारिदो वा, कीरंतो वा, समणुमण्णिदो, तस्स मिच्छा मे दुक्कडं ॥२-१२-४॥

पडिक्कमामि भंते ! सामाइय पडिमाए :- मण दुप्पणि- धाणेण वा, वय दुप्पणिधाणेण वा, काय दुप्पणि- धाणेण वा, अणादरेण वा, सदि अणुव्वट्ठावणेण वा, जो मए देवसिओ (राइयो) अइचारो, अणाचारो, मणसा, वचसा, काएण, कदो वा, कारिदो वा, कीरंतो वा, समणुमण्णिदो, तस्स मिच्छा मे दुक्कडं ॥३॥

पडिक्कमामि भंते ! पोसह पडिमाएः- अप्पडिवेक्खिया - पमज्जियो सग्गेण वा, अप्पडिवेक्खि- यापमज्जियादाणेण वा, अप्पडिवेक्खिया- पमज्जिया- संथारोवक्कमणेण वा, आवस्स- यणादरेण वा, सदिअणुवट्ठावणेण वा, जो मए

देवसिओ (राइयो) अइचारो, अणाचारो, मणसा, वचसा, काएण, कदो वा, कारिदो वा, कीरंतो वा, समणुमण्णिदो, तस्स मिच्छा मे दुक्कडं ॥४॥

पडिक्कमामि भंते ! सचित्त विरदि पडिमाए :- पुढविकाइया जीवा असंखेज्जासंखेज्जा, आउकाइया जीवा असंखेज्जासंखेज्जा, तेउ काइया जीवा असंखेज्जा संखेज्जा, वाउकाइया जीवा असंखेज्जासंखेज्जा, वणप्फदिकाइया जीवा अणंताणंता, हरिया, बीया, अंकुरा, छिण्णा, भिण्णा, एदेसिं उद्दावणं, परिदावणं, विराहणं, उवघादो, जो मए देवसियो (राइयो) अइचारो अणाचारोमणसा वचसाकाएण कदो वा, कारिदो वा, कीरंतो वा, समणुमण्णिदो, तस्स मिच्छा मे दुक्कडं ॥५॥

पडिक्कमामि भंते ! राइभत्त विरदि पडिमाए :-णवविह बंभचरियस्स दिवा जो मए देवसिओ (राइयो) अइचारो, अणाचारो, मणसा, वचसा, काएण, कदो वा, कारिदो वा, कीरंतो वा, समणुमण्णिदो, तस्स मिच्छा मे दुक्कडं ॥६॥

पडिक्कमामि भंते ! बंभ पडिमाए:- इत्थिराय-कहायत्तणेण वा, इत्थि मणोहरांग निरिक्खिणेण वा, पुव्वरयाणुस्सरणेण वा, काम कोवण-रसा सेवणेण वा, शरीर मंडणेण वा, जो मए देवसिओ (राइयो) अइचारो,

अणाचारो, मणसा, वचसा, काएण, कदो वा, कारिदो वा, कीरंतो वा, समणुमण्णिदो, तस्स मिच्छा मे दुक्कडं ॥७॥

पडिक्कमामि भंते ! आरंभ विरदि पडिमाए :- कसायवसंगएण आरम्भो, जो मए देवसिओ (राइयो) अइचारो अणाचारो, मणसा, वचसा, काएण, कदो वा, कारिदो वा, कीरंतो वा, समणुमण्णिदो, तस्स मिच्छा मे दुक्कडं ॥८॥

पडिक्कमामि भंते ! परिग्गह विरदि पडिमाए :- वत्थमेत्त परिग्गहादो अवरम्मि परिग्गहे मुच्छा परिणामे जो मए देवसियो (राइयो) अइचारो, अणाचारो, मणसा, वचसा, काएण, कदो वा, कारिदो वा, कीरंतो वा, समणुमण्णिदो, तस्स मिच्छा मे दुक्कडं ॥९॥

पडिक्कमामि भंते ! अणुमण विरदि पडिमाए :- जं किं पि अणुमणणं पुट्ठापुट्ठेण जो मए देवसियो (राइयो) मणसा, वचसा, काएण, कदो वा, कारिदो वा, कीरंतो वा, समणुमण्णिदो, तस्स मिच्छा मे दुक्कडं ॥१०॥

पडिक्कमामि भंते ! उद्दिट्ठ विरदि पडिमाए:- उद्दिट्ठ दोस बहुलं आहारादियं आहारयं वा आहारावियं वा आहारिज्जंतं वा जो मए देवसियो (राइयो) मणसा वचसा काएण कदोवा कारिदो वा कीरंतो वा समणुमण्णिदो, तस्स मिच्छा मे दुक्कडं ॥११॥

# निर्ग्रन्थ पद की वांछा

इच्छामि भंते ! इमं णिग्गंथं पवयणं अणुत्तरं केवलियं, पडिपुण्णं, णेगाइयं, सामाइयं, संसुद्धं, सल्लघट्टाणं, सल्लघत्ताणं, सिद्धिमग्गं, सेढिमग्गं, खंतिमग्गं, मुत्तिमग्गं, पमुत्तिमग्गं, मोक्खमग्गं, पमोक्खमग्गं, णिज्जाणमग्गं, णिव्वाणमग्गं, सव्वदुःख परिहाणिमग्गं, सुचरिय परिणिव्वाणमग्गं, अवितहं, अविसंति-पवयणं, उत्तमं तं सद्दहामि, तं पत्तियामि, तं रोचेमि, तं फासेमि, इदोत्तरं अण्णं णत्थि, ण भूदं, ण भविस्सदि, णाणेण वा, दंसणेण वा, चरित्तेण वा, सुत्तेण वा, इदो जीवा सिज्झंति, बुज्झंति, मुच्चंति, परिणिव्वाण-यंति, सव्व दुक्खाण-मंतं करेंति, पडि-वियाणंति समणोमि-संजदोमि, उवरदोमि, उवसंतोमि-उवहि-णियडि- माण-माया- मोसमूरण मिच्छाणाण-मिच्छादंसण- मिच्छाचरित्तं च पडिविरदोमि, सम्मणाण- सम्मदंसण- सम्मचरित्तं च रोचेमि, जं जिणवरेहिं पण्णत्तो, इत्थ मे जो कोई (राइओ) देवसिओ अइचारो अणाचारो, तस्स मिच्छा मे दुक्कडं।

इच्छामि भंते ! पडिक्कमणाइचार-मालोचेउं जो मए देवसिओ (राइयो) अइचारो, अणाचारो, आभोगो, अणाभोगो, काइयो, वाइयो, माणसिओ, दुच्चरिओ, दुच्चारिओ, दुब्भासिओ, दुप्परिणामिओ, णाणे, दंसणे, चरित्ते, सुत्ते, सामाइए, एयारसण्हं-पडिमाणं विराहणाए, अट्ठविहस्स कम्मस्स-णिग्घादणाए, अण्णहा उस्सासिदेण वा, णिस्सासिदेण वा, उम्मिस्सिदेण वा, णिम्मिस्सिदेण वा, खासिदेण वा, छिंकिदेण वा, जंभाइदेण वा, सुहुमेहिं-अंग-चलाचलेहिं, दिट्ठिचलाचलेहिं, एदेहिं सव्वेहिं, अ-समाहिं-पत्तेहिं, आयरेहिं, जाव अरहंताणं, भयवंताणं, पज्जुवासं, करेमि, तावकायं पावकम्मं दुच्चरियं वोस्सरामि।

दंसण वय सामाइय, पोसह सचित्त राइभत्ते य।
बंभाऽऽरंभ परिग्गह, अणुमणमुद्दिट्ठ देसविरदे य॥१॥

एयासु जधा कहिद पडिमासु पमादाइ कयाइचार सोहणट्ठं छेदोवट्ठावणं होदु मज्झं। अरहंत सिद्ध आयरिय उवज्झाय सव्वसाहु सक्खियं, सम्मत्त पुव्वगं, सुव्वदं दिढव्वदं समारोहियं मे भवदु, मे भवदु, मे भवदु।

**अथ देवसिय (राइय) पडिक्कमणाए सव्वाइचार विसोहि, णिमित्तं, पुव्वाइरियकमेण निष्ठितकरण वीरभक्ति काउस्सग्गं करोमि।**

(इति विज्ञाप्य–णमो अरहंताणं इत्यादि दण्डकं 236 पृष्ठे पठित्वा कायोत्सर्गं कुर्यात्। जीवियित्यादि स्तवं पठेत्।)

## श्री वीर भक्ति

**यः सर्वाणि चराचराणि विधिवद् द्रव्याणि तेषां गुणान्,**
**पर्यायानपि भूत-भावि-भवितः सर्वान् सदा सर्वदा।**
**जानीते युगपत् प्रतिक्षण मतः सर्वज्ञ-इत्युच्यते,**
**सर्वज्ञाय जिनेश्वराय महते वीराय तस्मै नमः॥१॥**

**वीरः सर्व-सुराऽसुरेन्द्र-महितो वीरं बुधाः संश्रिताः,**
**वीरेणाभिहतः स्व-कर्म-निचयो वीराय भक्त्या नमः।**
**वीरात् तीर्थ-मिदं-प्रवृत्त-मतुलं वीरस्य घोरं तपो,**
**वीरे श्री-द्युति-कान्ति-कीर्ति-धृतयो हे वीर ! भद्रं त्वयि॥२॥**

**ये वीर-पादौ प्रणमन्ति नित्यं,**
**ध्यान-स्थिताः संयम योग - युक्ताः।**

ते वीत शोका हि भवन्ति लोके,
संसार दुर्गं विषमं तरन्ति ॥३॥

व्रत-समुदय मूलः संयम-स्कन्ध-बन्धो,
यम नियम पयोभि-र्वर्धितः शील-शाखः।
समिति-कलिक-भारो गुप्ति-गुप्त-प्रवालो,
गुण-कुसुम सुगन्धिः सत्-तपश्चित्र-पत्रः ॥४॥

शिव-सुख-फलदायी यो दया-छाय-योघः,
शुभजन-पथिकानां खेदनोदे-समर्थः।
दुरित-रविज-तापं प्रापयन्नन्तभावं,
स भव-विभव-हान्यै नोऽस्तु चारित्र-वृक्षः ॥५॥

चारित्रं सर्व-जिनैश्चरितं प्रोक्तं च सर्व-शिष्येभ्यः।
प्रणमामि पञ्च-भेदं पञ्चम-चारित्र-लाभाय ॥६॥

धर्मः सर्व-सुखाकरो हितकरो धर्मं बुधाश्चिन्वते,
धर्मेणैव समाप्यते शिव-सुखं धर्माय तस्मै नमः।
धर्मान्नास्त्यपरः सुहृद् भव-भृतां धर्मस्य मूलं दया,
धर्मे चित्तमहं दधे प्रतिदिनं हे धर्म ! मां पालय ॥७॥

धम्मो मंगल-मुक्किट्ठं अहिंसा संयमो तवो।
देवा वि तस्स पणमंति जस्स धम्मे सया मणो ॥८॥

इच्छामि भंते ! वीरभत्ति काउस्सग्गं करेमि तत्थ देसासिआ, असणासिआ, ठाणासिआ, कालासिआ, मुद्दासिआ, काउसग्गासिआ, पणमासिआ, आवत्तासिआ, पडिक्कमणाए तत्थसु आवासएसु परिहीणदाए जो मए अच्चासणा देवसिय (राइयो) मणसा, वचसा, काएण, कदो वा, कारिदो वा, कीरंतो वा, समणुमण्णिदो तस्स मिच्छा मे दुक्कडं॥९॥

दंसण वय सामाइय, पोसह सचित्त राइभत्ते य।
बंभाऽऽरंभ-परिग्गह, अणुमणमुद्दिट्ठ देसविरदे य॥

एयासु जधा कहिद पडिमासु पमादाइ कयाइचार सोहणट्ठं छेदोवट्ठावणं होदु मज्झं। अरहंत सिद्ध आयरिय उवज्झाय सव्वसाहु सक्खियं, सम्मत्त पुव्वगं, सुव्वदं दिढव्वदं समारोहियं मे भवदु, मे भवदु, मे भवदु।

अथ देवसिय (राइय) पडिक्कमणाए सव्वाइचार विसोहिणिमित्तं, पुव्वाइरिय कमेण चउवीस तित्थयर भत्ति काउस्सग्गं करोमि।

(इति विज्ञाप्य–णमो अरहंताणं इत्यादि दण्डकं 236 पृष्ठे पठित्वा कायोत्सर्गं कुर्यात् – जीवियित्यादि स्तवं पठेत्।)

# श्री चतुर्विंशति तीर्थंकर भक्ति

चउवीसं तित्थयरे, उसहाइ-वीर-पच्छिमे वन्दे।
सव्वे सगण-गण-हरे, सिद्धे सिरसा णमस्सामि ॥१ ॥

ये लोकेऽष्ट-सहस्र-लक्षण-धराः, ज्ञेयार्णवान्तर्गताः,
ये सम्यग्-भव-जाल-हेतु-मथनाश्, चन्द्रार्क-तेजोऽधिकाः।
ये साध्विन्द्र-सुराप्सरो-गण-शतैर्, गीत-प्रणूत्यार्चितास्,
तान् देवान् वृषभादि-वीर-चरमान्, भक्त्या नमस्याम्यहम् ॥२ ॥

नाभेयं देवपूज्यं जिनवर-मजितं, सर्व-लोकप्रदीपं,
सर्वज्ञं सम्भवाख्यं मुनिगणवृषभं, नन्दनं देवदेवम्।
कर्मारिघ्नं सुबुद्धिं, वर कमलनिभं पद्म पुष्पाभिगन्धं
क्षान्तं दान्तं सुपार्श्वं, सकल शशिनिभं चन्द्रनामानमीडे ॥३ ॥

विख्यातं पुष्पदन्तं भव भय मथनं, शीतलं लोक-नाथं,
श्रेयांसं शील-कोशं, प्रवर-नर-गुरुं वासुपूज्यं सुपूज्यम्।
मुक्तं दान्तेन्द्रियाश्वं, विमल-मृषि पतिं सैंहसैन्यं मुनीन्द्रं,
धर्मं सद्धर्म-केतुं शम-दम-निलयं स्तौमि शांतिं शरण्यम् ॥४ ॥

कुंथुं सिद्धालयस्थं श्रमणपतिमरं त्यक्त-भोगेषु चक्रं,
मल्लिं विख्यात-गोत्रं खचर-गण-नुतं सुव्रतं सौख्य राशिम्।
देवेन्द्रार्च्यं नमीशं हरि कुल तिलकं नेमिचन्द्रं भवान्तं,
पार्श्वं नागेन्द्र वन्द्यं शरण-महमितो वर्धमानं च भक्त्या ॥५ ॥

इच्छामि भन्ते ! चउवीस-तित्थयर-भत्ति- काउस्सग्गो कओ, तस्सालोचेउं, पंच - महाकल्लाण - संपण्णाणं अट्ठमहापाडिहेरसहियाणं, चउतीसाऽतिसय- विसेस-संजुत्ताणं बत्तीस- देविंद-मणिमय-मउड- मत्थय-महिदाणं, बलदेव-वासुदेव - चक्कहर- रिसि-मुणि-जइ-अणगारोवगूढाणं, थुइ-सय-सहस्स- णिलयाणं, उसहाइ-वीर-पच्छिम-मंगल-महापुरिसाणं, सया णिच्चकालं अच्चेमि, पुज्जेमि, वंदामि, णमस्सामि, दुक्खक्खओ, कम्मक्खओ, बोहिलाओ, सुगइगमणं, समाहिमरणं, जिणगुण संपत्ति होउ मज्झं।

दंसण वय सामाइय, पोसह सचित्त राइभत्ते य।
बंभाऽऽरंभ परिग्गह, अणुमणमुद्दिट्ठ देसविरदे य॥

एयासु जधा कहिद पडिमासु पमादाइकयादिचार सोहणट्ठं छेदोवट्ठावणं होदु मज्झं। अरहंत सिद्ध आयरिय उवज्झाय सव्वसाहु सक्खियं, सम्मत्त पुव्वगं, सुव्वदं दिढव्वदं समारोहियं मे भवदु, मे भवदु, मे भवदु।

अथ देवसिय (राइय) पडिक्कमणाए सव्वादिचार विसोहिणिमित्तं, पुव्वायरिय कमेण आलोयण श्री सिद्ध भत्ति पडिक्कमण भत्ति णिट्ठिद करण वीरभत्ति चउवीस-तित्थयर भत्ति कृत्वा तद्धीनाधिक-त्वादिदोष परिहारार्थं सकल दोष

निराकरणार्थं सर्वमलातिचार विशुद्ध्यर्थं आत्मपवित्रीकरणार्थं समाधिभक्ति कायोत्सर्गं करोमि। (णमोकार ९ गुणिवा)

## अथेष्ट प्रार्थना

प्रथमं करणं चरणं द्रव्यं नमः।

शास्त्राभ्यासो जिनपति-नुतिः सङ्गतिः सर्वदार्यैः,
सद्वृत्तानां गुण-गण-कथा दोषवादे च मौनम्।
सर्वस्यापि प्रिय-हित-वचो भावना चात्म-तत्त्वे,
सम्पद्यन्तां मम भव-भवे यावदेतेऽपवर्गः॥१॥

तव पादौ मम हृदये मम हृदयं तव पदद्वये लीनम्।
तिष्ठतु जिनेन्द्र ! तावद् यावन् निर्वाण-सम्प्राप्तिः॥२॥

अक्खर-पयत्थ-हीणं मत्ता-हीणं च जं मए भणियं।
तं खमउ णाण देवय ! मज्झवि दुक्खक्खयं कुणउ॥३॥

### अञ्चलिका

इच्छामि भन्ते ! समाहिभत्ति-काउस्सग्गो कओ, तस्सालोचेउं, रयणत्तय-सरूव- परमप्प-ज्झाण- लक्खण-समाहि-भत्तीए सया णिच्चकालं अच्चेमि, पुज्जेमि, वंदामि, णमस्सामि दुक्खक्खओ, कम्मक्खओ, बोहिलाओ, सुगइगमणं, समाहिमरणं, जिणगुण संपत्ति होउ मज्झं।

॥ इति श्रावक प्रतिक्रमण॥

# आचार्य वन्दना

अथ पौर्वाह्णिक (आपराह्णिक) आचार्य वन्दना-क्रियायां पूर्वाचार्यानुक्रमेण, सकल-कर्म-क्षयार्थं, भाव-पूजा-वन्दना-स्तव-समेतं श्री सिद्ध भक्ति कायोत्सर्गं कुर्वेऽहं। (27 श्वासोच्छ्वास में कायोत्सर्ग करें)

सम्मत्त-णाण-दंसण-वीरिय-सुहुमं तहेव अवगहणं।
अगुरु-लघु-मव्वावाहं, अट्ठगुणा होंति सिद्धाणं॥१॥
तव-सिद्धे णय-सिद्धे, संजम-सिद्धे चरित्त-सिद्धे य।
णाणम्मि दंसणम्मि य, सिद्धे सिरसा णमस्सामि॥२॥

(अञ्चलिका)

इच्छामि भन्ते ! सिद्ध भत्ति काउस्सग्गो कओ तस्सालोचेउं सम्मणाण - सम्मदंसण - सम्मचरित्त जुत्ताणं अट्ठविह- कम्म-विप्प-मुक्काणं, अट्ठ-गुण-संपण्णाणं, उड्ढलोय- मत्थयम्मि पयट्ठियाणं, तव-सिद्धाणं, णय-सिद्धाणं, संजम-सिद्धाणं, चरित्त-सिद्धाणं, अतीताणागद-वट्टमाण- कालत्तय-सिद्धाणं, सव्व-सिद्धाणं, णिच्चकालं,

अच्चेमि, पुज्जेमि, वंदामि, णमस्सामि, दुक्खक्खओ, कम्मक्खओ, बोहिलाओ, सुगइ-गमणं, समाहि-मरणं, जिण-गुण- सम्पत्ति होउ मज्झं।

अथ पौर्वाह्णिक (आपराह्णिक) आचार्य वन्दना-क्रियायां पूर्वाचार्यानुक्रमेण, सकल-कर्म-क्षयार्थं, भाव-पूजा-वन्दना- स्तव-समेतं श्री श्रुत भक्ति कायोत्सर्गं कुर्वेऽहं।

(27 श्वासोच्छ्वास में कायोत्सर्ग करें)

कोटी-शतं द्वादश चैव कोट्यो, लक्षाण्यशीतिस् त्र्यधिकानि चैव।
पञ्चाश-दष्टौ च सहस्र-संख्या-मेतच्छ्रुतं पञ्च-पदं नमामि॥१॥

अरहंत-भासियत्थं गणहर - देवेहिं गंथियं सम्मं।
पणमामि भत्तिजुत्तो सुदणाण - महोवहिं सिरसा॥२॥

अञ्चलिका

इच्छामि भन्ते ! सुद भत्ति-काउस्सग्गो कओ, तस्सालोचेउं अंगोवंग-पइण्णय-पाहुडय-परियम्म-सुत्त पढमाणिओग पुव्वगय-चूलिया चेव सुत्तत्थय-थुइ-धम्म-कहाइयं, णिच्चकालं अच्चेमि, पुज्जेमि, वंदामि, णमस्सामि,

दुक्खक्खओ, कम्मक्खओ, बोहिलाओ, सुगइ-गमणं, समाहि-मरणं, जिण-गुण-संपत्ति होउ मज्झं।

अथ पौर्वाह्णिक (आपराह्णिक) आचार्य वन्दना-क्रियायां पूर्वाचार्यानुक्रमेण, सकल-कर्म-क्षयार्थं, भाव-पूजा-वन्दना- स्तव-समेतं श्री आचार्य भक्ति कायोत्सर्गं कुर्वेऽहं।

(27 श्वासोच्छ्वास में कायोत्सर्ग करें)

श्रुत-जलधि-पारगेभ्यः, स्व-पर-मत-विभावना-पटु-मतिभ्यः।
सुचरित-तपो-निधिभ्यो, नमो गुरुभ्यो गुण-गुरुभ्यः॥१॥

छत्तीस-गुण-समग्गे, पञ्च-विहाचार-करण-संदरिसे।
सिस्साणुग्गह-कुसले, धम्माइरिए सदा वन्दे॥२॥

गुरु-भत्ति संजमेण य, तरन्ति संसार-सायरं घोरम्।
छिण्णंति अट्ठ-कम्मं, जम्मण-मरणं ण पावेंति॥३॥

ये नित्यं व्रत-मंत्र-होम-निरता, ध्यानाग्नि-होत्राकुलाः
षट्-कर्माभि-रतास्तपोधन-धनाः, साधु-क्रियाः साधवः॥

शील-प्रावरणा-गुण-प्रहरणाश्-चन्द्रार्क-तेजोऽधिका,
मोक्ष-द्वार-कपाट-पाटन-भटाः प्रीणन्तु माम् साधवः ॥४॥

गुरवः पांतु नो नित्यं, ज्ञान दर्शन-नायकाः।
चारित्रार्णव-गम्भीरा, मोक्ष-मार्गोपदेशकाः ॥५॥

(अञ्चलिका)

इच्छामि भन्ते ! आइरिय भत्ति काउस्सग्गो कओ, तस्सालाचेउं सम्मणाण, सम्मदंसण-सम्मचारित जुत्ताणं, पंच-विहाचाराणं, आइरियाणं, आयारादि सुद- णाणोवदेसयाणं उवज्झायाणं, तिरयण-गुण-पालण- रयाणं सव्वसाहूणं, णिच्चकालं अच्चेमि, पुज्जेमि, वंदामि, णमस्सामि, दुक्खक्खओ, कम्मक्खओ, बोहिलाओ, सुगइ-गमणं, समाहि-मरणं, जिण गुण-सम्पत्ति होउ मज्झं।

महामृत्युञ्जय मंत्र

ॐ ह्रां णमो अरिहंताणं ॐ ह्रीं णमो सिद्धाणं ॐ ह्रूँ णमो आइरियाणं ॐ ह्रौं णमो उवज्झायाणं ॐ ह्रः णमो लोए सव्व साहूणं मम सर्व ग्रहारिस्टान् निवारय-निवारय अपमृत्युं घातय-घातय सर्व शांतिं कुरु-कुरु स्वाहा।

# गुरु भक्ति

कल्पान्त काल वचनाविजयागुरूणां।
लोकोत्तराऽखिल गुणस्तवनं प्रशंसा॥
स्वामिन् नमोस्तु शिरसा मनसा वचोभिः।
दद्या शिवं विमल सागर सूरिवर्यः॥१॥
तुभ्यं नमः रवि समा तव तेजकाय।
तुभ्यं नमः शशि समुज्ज्वल वैभवाय॥
तुभ्यं नमः दुरित जाल विनाशनाय।
तुभ्यं नमः गुरु विराग शिव प्रदाय॥२॥
तुभ्यं नमः सकल संयम धारकाय।
तुभ्यं नमः परम तत्त्व प्रकाशकाय॥
तुभ्यं नमः सुयश मंगल बोधकाय।
तुभ्यं नमः भरत सिन्धु सुवन्दकाय॥३॥
तुभ्यं नमः परम धर्म प्रभावकाय।
तुभ्यं नमः प्रबल बुद्धि विकाशकाय॥
तुभ्यं नमः परम शांति प्रदायकाय।
तुभ्यं नमः विशद सिन्धु गुणार्णवाय॥4॥

आहारे–विहारे–निहारे शयने जागरणे सामायिके पठन–पाठने रागेण दोषेण मोहेन भयेन क्रोधमान माया लोभेन प्रमादेन त्रययोगेन यत् यत् दुष्कर्म देहि प्रायश्चित मम पापं मिथ्या भवतु।

कायोत्सर्ग करें।

# सामायिक विधि

पूर्व दिशा में नौ बार णमोकार मंत्र का जाप्य कर नमस्कार करते हुए–

**प्राग्-दिग्-विदिगन्तरे, केवलि-जिन-सिद्ध-साधुगण-देवाः ये सर्वर्द्धि-समृद्धा, योगि-गणाँस्तानहं वन्दे ॥१॥**

दक्षिण दिशा में नौ बार णमोकार मंत्र का जाप्य कर नमस्कार करते हुये–

**दक्षिण-दिग्-विदिगन्तरे, केवलि-जिन-सिद्ध-साधुगण- देवाः ये सर्वर्द्धि-समृद्धा, योगि-गणाँस्तानहं वन्दे ॥२॥**

पश्चिम दिशा में नौ बार णमोकार मंत्र का जाप्य कर नमस्कार करते हुये–

**पश्चिम-दिग्-विदिगन्तरे, केवलि-जिन-सिद्ध-साधुगण-देवाः ये सर्वर्द्धि-समृद्धा, योगि-गणाँस्तानहं वन्दे ॥३॥**

उत्तर दिशा में नौ बार णमोकार मंत्र का जाप्य कर नमस्कार करते हुये–

**उत्तर-दिग्-विदिगन्तरे, केवलि-जिन-सिद्ध-साधुगण-देवाः ये सर्वर्द्धि-समृद्धा, योगि-गणाँस्तानहं वन्दे ॥४॥**

**प्रतिज्ञा** – पिच्छिका युक्त दोनों हाथों को मुकुलित कर और कुहनियों को उदर पर रखकर यथास्थान मस्तक झुकाते हुए प्रतिज्ञा करें –

**तीर्थंकर केवलि, सामान्य केवलि, समुद्घात केवलि, उपसर्ग केवलि, मूक केवलि, अन्तःकृत केवलिभ्यो नमो नमः। तीर्थंकरोपदिष्टश्रुताय नमो नमः। सम्यग्दर्शन-ज्ञान-चारित्र-धारकाचार्योपाध्याय-सर्वसाधुभ्यो नमो नमः। श्री मूलसंघे, कुन्दकुन्दाम्नाये, बलात्कार-गणे, सेन-गच्छे, नन्दी-संघस्य परम्परायाम्, श्री आदिसागराचार्या जातास्तत् शिष्याः श्री महावीर कीर्ति आचार्य-जातास्तत् शिष्याः श्री**

विमलसागराचार्या-जातास्तत् शिष्याः श्री विरागसागराचार्य, श्री भरतसागराचार्या- जातास्तत् शिष्या श्री विशद सागराचार्य जातास्तत् शिष्याः...............अहम् (अपना नाम बोलना) जम्बू वृक्षोपलक्षित जम्बूद्वीपे, भरत क्षेत्रे, आर्य-खण्डे, भारत देशे,.................प्रान्ते.......................नगरे १००८ श्री........ ...................... जिन- चैत्यालयमध्ये, अद्य वीर निर्वाण संवत्...............वि.संवत्................मासोत्तमासे................ मासे............पक्षे..........शुभ तिथौ..........वासरे पौर्वाह्णिक (माध्यान्हिक) (आपराह्णिक) काले, घटिका-द्वय (४८ मिनट) पर्यन्तं सर्व-सावद्य-योग- विरतोऽस्मि।

ईर्यापथ शुद्धि

पडिक्कमामि भंते ! इरिया-वहियाए, विराहणाए, अणागुत्ते, अइग्गमणे, णिग्गमणे, ठाणे, गमणे, चंकमणे, पाणुग्गमणे, बीजुग्गमणे, हरिदुग्गमणे, उच्चारपस्सवण-खेल-सिंहाण-वियडियपइट्ठावणियाए, जे जीवा एइंदिया वा, बेइंदिया वा, तेइंदिया वा, चउरिंदिया वा, पंचिंदिया वा, णोल्लिदा वा, पेल्लिदा वा, संघट्टिदा वा, संघादिदा वा, उद्दाविदा वा, परिदाविदा वा, किरिंच्छिदा वा, लेस्सिदा वा, छिंदिदा वा, भिंदिदा वा, ठाणदो वा, ठाणचंकमणदो वा, तस्स उत्तरगुणं, तस्स पायच्छित्त-करणं, तस्स विसोहि-करणं, जाव अरहंताणं, भयवंताणं, णमोक्कारं, पज्जुवासं करेमि, ताव कालं, पावकम्मं दुच्चरियं वोस्सरामि। (कायोत्सर्ग करें)

## ईर्यापथ आलोचना

ईर्या - पथे प्रचलताद्य मया प्रमादा-
देकेन्द्रिय-प्रमुख-जीव-निकाय-बाधा।
निर्वर्तिता यदि भवेदयुगान्तरेक्षा,
मिथ्या तदस्तु दुरितं गुरु-भक्तितो मे॥१॥

इच्छामि भन्ते ! इरियावहियस्स आलोचेउं, पुव्वुत्तर-दक्खिण-पच्छिम-चउदिस-विदिसासु, विहरमाणेण जुगतंर-दिट्ठिणा, भव्वेण, दट्ठव्वा। पमाद-दोषेण, डव-डव-चरियाए, पाण-भूद-जीव-सत्ताणं, उवघादो, कदो वा, कारिदो वा, कीरंतो वा, समणुमण्णिदो तस्स मिच्छा मे दुक्कडं।

## कृत्य प्रतिज्ञा

नमोऽस्तु भगवन् ! देव-वन्दनां करिष्यामि।

## मुख्य मंगल

सिद्धं सम्पूर्ण-भव्यार्थ सिद्धेः कारण-मुत्तमम्।
प्रशस्त-दर्शन-ज्ञान-चारित्र-प्रतिपादनम्॥१॥
सुरेन्द्र - मुकुटाश्लिष्ट - पाद - पद्मांशु-केशरम्।
प्रणमामि महावीरं लोक-त्रितय मंगलम्॥२॥

## सामायिक स्वीकार

खम्मामि सव्व-जीवाणं, सव्वे जीवा खमंतु मे।
मित्ती मे सव्व-भूदेसु, वैरं मज्झं ण केणवि॥१॥

राग-बंध पदोसं च, हरिसं दीण-भावयं।
उस्सुगत्तं भयं सोगं, रदि-मरदिं च वोस्सरे ॥२॥
हा ! दुट्ठ-कयं, हा ! दुट्ठ-चिंतियं भासियं च हा ! दुट्ठं।
अंतो-अंतो डज्झमि पच्छत्तावेण वेयंतो ॥३॥
दव्वे खेत्ते काले भावे य कदा-वराह-सोहणयं।
णिंदण-गरहण-जुत्तो, मण-वच-काएण पडिक्कमणं ॥४॥
समता, सर्व-भूतेसु, संयमः शुभ-भावना।
आर्त्त-रौद्र-परित्याग-स्तद्धि सामायिकं मतं ॥५॥

अथ कृत्य-विज्ञापना

भगवन् ! नमोऽस्तु प्रसीदन्तु, प्रभू-पादा-वंदिष्येऽहं।
एषोऽहं सर्व-सावद्य-योगाद्-विरतोऽस्मि।

**अथ पौर्वाह्णिक (माध्याह्निक) (आपराह्णिक) देव-वंदना-क्रियायां पूर्वाचार्यानुक्रमेण, सकलकर्म-क्षयार्थं भाव-पूजा-वंदना-स्तव-समेतं श्री चैत्यभक्ति कायोत्सर्गं करोम्यहम्।**

(सर्वप्रथम पंचांग नमस्कार करें, पश्चात् तीन आवर्त और एक शिरोनति कर णमो अरिहंताणं आदि दण्डक पेज नं. 137 पर पढ़ें।)

श्री चैत्य भक्ति पेज नं. 285 पर पढ़ें।

**अथ पौर्वाह्णिक देव वंदना-क्रियायां पूर्वाचार्यानुक्रमेण सकल-कर्म-क्षयार्थं, भाव-पूजा- वंदना- स्तव समेतं श्री पंच-महागुरुभक्ति कायोत्सर्गं करोम्यहम्।**

णमो अरिहंताणं आदि दण्डक पेज नं. 137 पर पढ़ें।

# पंचमहागुरु भक्ति (प्राकृत)

मणुय-णाइंद-सुर-धरिय-छत्तत्तया,
पंचकल्लाण-सोक्खावली-पत्तया।
दंसणं णाण झाणं अणंतं बलं,
ते जिणा दिंतु अम्हं वरं मंगलं॥१॥
जेहिं झाणग्गि-वाणेहिं अइ-दड्ढयं,
जम्म-जर मरण-णयर-त्तयं दड्ढयं।
जेहिं पत्तं सिवं सासयं ठाणयं,
ते महं दिंतु सिद्धा वरं णाणयं॥२॥
पंच-आचार-पंचग्गि-संसाहया,
बारसंगाइ-सुअ-जलहि-अवगाहया।
मोक्ख-लच्छी महंती महंते सया,
सूरिणो दिंतु मोक्खं-गया-संगया॥३॥

घोर-संसार-भीमाडवी-काणणे,
तिक्ख-वियराल-णह-पाव-पंचाणणे।
णट्ठ-मग्गाण जीवाण पहदेसिया,
वंदिमो ते उवज्झाय अम्हे सया॥४॥

उग्ग-तव-चरण-करणेहिं झीणं गया,
धम्मवर-झाण-सुक्केक्क-झाणं-गया।
णिब्भरं तव-सिरी-ए-समा-लिंगया,
साहवो ते महा-मोक्ख-पथ-मग्गया॥५॥

एण थोत्तेण जो पंचगुरु वंदए,
गुरुय-संसार-घण-वेल्लि सो छिंदए।
लहइ सो सिद्ध-सोक्खाइ बहु-माणणं,
कुणइ कम्मिंधणं पुंज-पज्जालणं॥६॥

अरुहा सिद्धा इरिया उवझाया साहु पंचपरमेट्ठी।
एदे पंच-णमोयारा भवे-2 मम सुहं दिंतु॥७॥

अञ्चलिका

इच्छामि भन्ते ! पंचमहागुरु-भक्ति काउस्सग्गो कओ, तस्सालोचेउं। अट्ठ-महा-पाडिहेर-संजुत्ताणं अरहंताणं, अट्ठ-गुण-संपण्णाणं उड्ढ-लोय-मत्थयम्मि पइट्ठियाणं सिद्धाणं, अट्ठ-पवयण-मउ-संजुत्ताणं, आइरियाणं, आयारादि-सुद-णाणोवदेसयाणं, उवज्झायाणं, ति-रयण-गुण-पालण-रदाणं सव्वसाहूणं, णिच्चकालं अच्चेमि, पुज्जेमि, वंदामि, णमस्सामि, दुक्खक्खओ, कम्मक्खओ, बोहिलाओ, सुगइ-गमणं, समाहि-मरणं, जिण-गुण-संपत्ति होउ मज्झं।

अथ पौर्वाह्णिक (माध्याह्णिक) (अपराह्णिक) देव वंदना-क्रियायां पूर्वाचार्यानुक्रमेण सकल-कर्म-क्षयार्थं, भाव-पूजा-वंदना-स्तव समेतं श्री चैत्यभक्ति, पंचगुरु- भक्ति कृत्त्वा तद्धीनाधिकत्वादि-दोष-विशुद्ध्यर्थं आत्म- पवित्री करणार्थं समाधि भक्ति कायोत्सर्गं करोम्यहम्।

## द्वात्रिंशतिका-सामायिक पाठ

सत्त्वेषु मैत्रीं गुणिषु प्रमोदं, क्लिष्टेषु जीवेषु कृपा-परत्वम्।
माध्यस्थ भावं विपरीत वृत्तौ, सदा ममात्मा विदधातु देव !॥१॥

शरीरतः कर्तुमनन्त-शक्तिं, विभिन्नमात्मान-मपास्त-दोषम्।
जिनेन्द्र ! कोषादिव खड्ग-यष्टिं, तव प्रसादेन ममास्तु शक्तिः॥२॥

दुःखे-सुखे वैरिणि-बन्धुवर्गे, योगे-वियोगे भवने-वने वा।
निराकृताशेष-ममत्व बुद्धेः, समं मनो मेऽस्तु सदापि नाथ !॥३॥

मुनीश! लीनाविव कीलिताविव, स्थिरौ निषाताविव बिम्बिताविव।
पादौ त्वदीयौ मम तिष्ठतां सदा, तमो धुनानौ हृदि दीपकाविव॥४॥

एकेन्द्रियाद्या यदि देव! देहिनः, प्रमादतः सञ्चरता इतस्ततः।
क्षता विभिन्ना मिलिता निपीडितास्ः, तदस्तु मिथ्या दुरनुष्ठितं तदा ॥५ ॥

विमुक्तिमार्ग-प्रतिकूल वर्तिना, मया कषायाक्ष-वशेन दुर्धिया।
चारित्र शुद्धेर्यदकारि लोपनं, तदस्तु मिथ्या मम दुष्कृतं प्रभो ! ॥६ ॥

विनिन्दनालोचन-गर्हणैरहं, मनोवचः काय कषाय - निर्मितम्।
निहन्मि पापं भव दुःख कारणं, भिषग्विषं मंत्र गुणै रिवाखिलम् ॥७ ॥

अतिक्रमं यद्विमते-र्व्यतिक्रमं, जिनातिचारं-सुचरित्र कर्मणः।
व्यधामनाचार-मपि प्रमादतः, प्रतिक्रमं तस्य करोमि शुद्धये ॥८ ॥

क्षतिं मनःशुद्धि-विधे-रतिक्रमं, व्यतिक्रमं शीलव्रते - र्विलंघनम्।
प्रभोऽतिचारं विषयेषु वर्तनं, वदन्त्यनाचार-मिहाति-सक्तताम् ॥९ ॥

यदर्थ मात्रा-पद-वाक्य-हीनं, मया प्रमादाद्यदि किञ्चनोक्तम्।
तन्मे क्षमित्वा विदधातु देवी, सरस्वती केवलबोध-लब्धिम् ॥१० ॥

बोधिः समाधिः परिणाम-शुद्धिः, स्वात्मोपलब्धिः शिव-सौख्य-सिद्धिः।
चिन्तामणिं चिन्तित-वस्तु-दाने, त्वां वन्द्यमानस्य ममास्तु देवि ॥११ ॥

यः स्मर्यते सर्व-मुनीन्द्र-वृन्दैर्, यः स्तूयते सर्व-नरामरेन्द्रैः।
यो गीयते वेदपुराणशास्त्रैः, स देवदेवो हृदये ममास्ताम् ॥१२ ॥

यो दर्शनज्ञान सुखस्वभावः, समस्त संसार विकार-वाह्यः।
समाधि-गम्यः परमात्म-संज्ञः, स देवदेवो हृदये ममास्ताम्॥१३॥

निषूदते यो भवदुःख-जालं, निरीक्षते यो जगदन्तरालम्।
योऽन्तर्गतो योगि-निरीक्षणीयः, स देवदेवो हृदये ममास्ताम्॥१४॥

विमुक्तिमार्ग प्रतिपादको यो-, यो जन्ममृत्यु व्यसनाद्यतीतः।
त्रिलोकलोकी विकलोऽ कलङ्कः, स देवदेवो हृदये ममास्ताम्॥१५॥

क्रोडी-कृताशेष-शरीरवर्गाः-, रागादयो यस्य न सन्ति दोषाः।
निरिन्द्रयो ज्ञानमयोऽनपायः, स देवदेवो हृदये ममास्ताम्॥१६॥

यो व्यापको विश्व-जनीनवृत्तेः-, सिद्धो विबुद्धो धुत-कर्मबन्धः।
ध्यातो धुनीते सकलं विकारं-, स देवदेवो हृदये ममास्ताम्॥१७॥

न स्पृश्यते कर्म कलङ्क दोषैर्- यो ध्वान्त सङ्घैरिव तिग्मरश्मिः।
निरञ्जनं नित्यमनेक-मेकं, तं देवमाप्तं शरणं प्रपद्ये॥१८॥

विभासते यत्र मरीचिमाली, न विद्यमाने भुवनाव-भासी।
स्वात्मस्थितं बोधमय-प्रकाशं, तं देवमाप्तं शरणं प्रपद्ये॥१९॥

विलोक्यमाने सति यत्र विश्वं, विलोक्यते स्पष्टमिदं विविक्तं।
शुद्धं शिवं शान्तमनाद्यनन्तं, तं देवमाप्तं शरणं प्रपद्ये॥२०॥

येन क्षता मन्मथ-मान-मूर्च्छा-, विषाद-निद्रा-भय शोक-चिन्ताः।
क्षतोऽनलेनेव तरु-प्रपञ्चस्, तं देवमाप्तं शरणं प्रपद्ये ॥२१॥

न संस्तरोऽश्मा न तृणं न मेदिनी, विधानतो नो फलको विनिर्मितः।
यतो निरस्ताक्ष-कषाय-विद्विषः, सुधीभिरात्मैव सुनिर्मलो मतः ॥२२॥

न संस्तरो भद्र ! समाधि-साधनं-, न लोकपूजा न च संघमेलनम्।
यतस्ततोऽध्यात्मरतो भवानिशं, विमुच्य सर्वामपि बाह्य-वासनाम्॥२३॥

न सन्ति बाह्या मम केचनार्थाः-, भवामि तेषां न कदाचनाहम्।
इत्थं विनिश्चित्य विमुच्य बाह्यं, स्वस्थः सदा त्वं भव भद्र मुक्त्यै ॥२४॥

आत्मान-मात्मन्यवलोकमानस्, त्वं दर्शनज्ञानमयो विशुद्धः।
एकाग्रचित्तः खलु यत्र-तत्र, स्थितोऽपि साधुर्लभते समाधिम्॥२५॥

एकः सदा शाश्वतिको ममात्मा, विनिर्मलः साधिगम-स्वभावः।
बहिर्भवाः सन्त्यपरे समस्ता, न शाश्वताः कर्मभवाः स्वकीयाः ॥२६॥

यस्यास्ति नैक्यं वपुषापि सार्द्धं, तस्यास्ति किं पुत्रकलत्रमित्रैः।
पृथक्कृते चर्मणि रोमकूपाः, कुतो हि तिष्ठन्ति शरीरमध्ये ॥२७॥

संयोगतो दुःखमनेक भेदं, यतोऽश्नुते जन्मवने शरीरी।
ततस्त्रिधासौ परिवर्जनीयो-यियासुना निर्वृतिमात्मनीनाम्॥२८॥

सर्वं निराकृत्य विकल्प-जालं, संसार-कान्तार-निपात-हेतुम्।
विविक्त-मात्मान-मवेक्ष्यमाणो-निलीयसे त्वं परमात्म तत्त्वे॥२९॥

स्वयं कृतं कर्म यदात्मना पुरा-, फलं तदीयं लभते शुभाशुभम्।
परेण दत्तं यदि लभ्यते स्फुटं, स्वयं कृतं कर्म निरर्थकं तदा॥३०॥

निजार्जितं कर्म विहाय देहिनो, न कोऽपि कस्यापि ददाति किञ्चन।
विचारयन्नेव-मनन्य-मानसः-, परो ददातीति विमुञ्च शेमुषीम्॥३१॥

यैः परमात्माऽमित-गतिवन्द्यः, सर्व-विविक्तो भृशमनवद्यः।
शश्व-दधीतो मनसि लभन्ते-, मुक्ति-निकेतं विभव-वरं ते॥३२॥

इति द्वात्रिंशतावृत्तैः परमात्मान - मीक्षते।
योऽनन्यगत चेतस्को, यात्यसौ पद-मव्ययम्॥३३॥

॥ इत्यमितगति सूरि विरचिता द्वात्रिंशतिका:॥

## चारित्र को नमन्

अनंत सुखसंपन्न चेनात्याय क्षणादपि।
नमस्तस्मै पवित्राय, चारित्राय पुनः-पुनः॥

# श्री ईर्यापथ भक्ति

## अर्हद् भक्ति

(स्रग्धरा छंदः)

निःसंगोऽहं जिनानां सदन-मनुपमं त्रिःपरीत्येत्य भक्त्या,
स्थित्वा गत्वा निषद्योच्चरण-परिणतोऽन्तः शनै-र्हस्त-युग्मम्।
भाले संस्थाप्य बुद्ध्या मम, दुरित-हरं कीर्तये शक्र-वन्द्यम्,
निन्दा-दूरं सदाप्तं क्षय-रहित-ममुं ज्ञान-भानुं जिनेन्द्रम्॥१॥

(बसंततिलका छंदः)

श्रीमत् पवित्रमकलंक-मनन्त-कल्पम्-
स्वायंभुवं सकल-मंगलमादि-तीर्थम्।
नित्योत्सवं मणिमयं निलयं जिनानाम्।
त्रैलोक्य-भूषणमहं शरणं प्रपद्ये॥२॥

(अनुष्टुप छंदः)

श्रीमत्-परम-गम्भीर, स्याद्वादामोघ-लाञ्छनम्।
जीयात्-त्रैलोक्यनाथस्य, शासनं जिन-शासनम्॥३॥

श्री-मुखालोकनादेव, श्री-मुखालोकनं भवेत्।
आलोकन-विहीनस्य, तत् सुखावाप्तयः कुतः॥४॥

अद्याभवत्-सफलता नयन-द्वयस्य,
देव ! त्वदीय-चरणाम्बुज-वीक्षणेन।
अद्य-त्रिलोक-तिलक ! प्रतिभासते मे,
संसारवारिधि-रयं चुलुक प्रमाणः॥५॥

अद्य मे क्षालितं गात्रं नेत्रे च विमलीकृते।
स्नातोऽहं धर्म-तीर्थेषु जिनेन्द्र ! तव दर्शनात्॥६॥

(उपेन्द्रवज्रा छंदः)

नमो नमः सत्त्व-हितंकराय, वीराय भव्याम्बुज-भास्कराय।
अनन्त-लोकाय सुरार्चिताय, देवाधि-देवाय नमो जिनाय॥७॥

नमो जिनाय त्रिदशार्चिताय, विनष्ट-दोषाय गुणार्णवाय।
विमुक्ति-मार्ग-प्रतिबोधनाय, देवाधि-देवाय नमो जिनाय॥८॥

देवाधिदेव! परमेश्वर! वीतराग! सर्वज्ञ! तीर्थंकर! सिद्ध! महानुभाव।
त्रैलोक्यनाथ! जिन-पुंगव! वर्धमान। स्वामिन्! गतोऽस्मि शरणं चरण-द्वयं ते।९।

(आर्या छंदः)

जित-मद-हर्ष-द्वेषा, जितमोह-परीषहाः जित-कषायाः।
जित-जन्म-मरण-रोगा, जित-मात्सर्या जयन्तु जिनाः॥१०॥

जयतु जिन वर्धमानस्-त्रिभुवन-हित-धर्म-चक्र-नीरज-बन्धुः।
त्रिदशपति-मुकुट-भासुर चूड़ामणि-रश्मि-रञ्जितारुण-चरणः॥११॥

(हरिणी छंदः)

जय जय जय त्रैलोक्य-काण्ड-शोभि-शिखामणे,
नुद नुद नुद स्वान्त-ध्वान्तं जगत्-कमलार्क नः।
नय नय नय स्वामिन् ! शान्तिं नितान्त-मनन्तिमाम्,
नहि नहि नहि त्राता, लोकैक-मित्र-भवत्-परः॥१२॥

चित्ते मुखे शिरसि पाणि-पयोज-युग्मे,
भक्तिं स्तुतिं विनति-मञ्जलि-मञ्जसैव।
चेक्रीयते चरिकरीति चरीकरीति,
यश्चर्करीति तव देव ! स एव धन्यः॥१३॥

(मंदाक्रान्ता छंदः)

जन्मोन्मार्ज्यं भजतु भवतः पाद-पद्मं न लभ्यम्,
तच्चेत्-स्वैरं चरतु न च दुर्देवतां सेवतां सः।
अश्नात्यन्नं यदिह सुलभं दुर्लभं चेन्मुधा-स्ते,
क्षुद्-व्यावृत्यै कवलयति कः कालकूटं बुभुक्षुः॥१४॥

(शार्दूल विक्रीडित छंद)

रूपं ते निरुपाधि-सुन्दर-मिदं, पश्यन् सहस्रेक्षणः,
प्रेक्षा-कौतुक-कारिकोऽत्र भगवन् नोपैत्यवस्थान्तरम्।
वाणीं गद्गद्यन् वपुः पुलकयन् नेत्र-द्वयं श्रावयन्,
मूर्द्धानं, नमयन् करौ मुकुलयंश् चेतोऽपि निर्वापयन्॥१५॥

त्रस्ताराति-रिति-त्रिकालविदित-त्राता त्रिलोक्या इति,
श्रेयः सूति-रिति श्रियां निधिरिति, श्रेष्ठः सुराणामिति।
प्राप्तोऽहं शरणं शरण्य-मगतिस्त्वां तत्-त्यजोपेक्षणम्,
रक्ष क्षेमपदं प्रसीद जिन ! किं, विज्ञापितैर्गोपितैः॥१६॥

(उपजाति छंदः)

त्रिलोक-राजेन्द्र-किरीट-कोटि-प्रभाभि-रालीढ़-पदारविन्दम्।
निर्मूल-मुन्मूलित-कर्म-वृक्षं, जिनेन्द्र-चन्द्रं प्रणमामि भक्त्या॥१७॥

करचरणतनु विघाता, दटतो निहितः प्रमादतः प्राणी।
ईर्यापथ मिति भीत्या मुञ्चे तद्दोष हान्यर्थम्॥१८॥

ईर्यापथे प्रचलताऽद्य मया प्रमादा,
देकेन्द्रिय प्रमुख जीव निकायबाधा।
निर्वर्तिता यदि भवेद युगान्तरेक्षा,
मिथ्या तदस्तु दुरितं गुरुभक्तितो मे॥१९॥

पडिक्कमामि भन्ते ! इरिया-वहियाए, विराहणाए, अणागुत्ते, अइग्गमणे, णिग्गमणे, ठाणे, गमणे, चंकमणे, पाणुग्गमणे, बीजुग्गमणे, हरिदुग्गमणे, उच्चार-पस्सवण-खेल-सिंहाण-वियडिय पइट्ठवणियाए, जे जीवा एइंदिया वा, बेइंदिया वा, तेइंदिया वा, चउरिंदिया वा, पंचिंदिया वा, णोल्लिदा वा, पेल्लिदा वा, संघट्टिदा वा, संघादिदा वा, उद्दाविदा वा, परिदाविदा वा, किरिंच्छिदा वा, लेस्सिदा वा, छिंदिदा वा, भिंदिदा वा, ठाणदो वा, ठाण-चंकमणदो वा, तस्स उत्तरगुणं, तस्स पायच्छित्त-करणं, तस्स विसोहि-करणं, जाव अरहंताणं, भयवंताणं, णमोक्कारं, पज्जुवासं करेमि, ताव कालं, पावकम्मं दुच्चरियं वोस्सरामि।

ॐ णमो अरहंताणं णमो सिद्धाणं णमो आइरियाणं।
णमो उवज्झायाणं णमो लोए सव्वसाहूणं॥ (जाप्यानि ९ बार)

मंत्र : ॐ णमो भयवदो वड्ढमाणस्य रिसहस्स चक्कं जलंतं गच्छइ आयासं, पायालं, लोयाणं, भूयाणं, जये वा, विवादे वा, थंभणे वा, रणंगणे वा, रायंगणे वा, मोहेण वा, सव्वजीवसत्ताणं, अपराजिदो भवदु रक्ख रक्ख स्वाहा।

ॐ नमो परमात्मने नमोऽनेकान्ताय शान्तये -

इच्छामि भन्ते ! आलोचेउं इरियावहियस्स पुव्वुत्तर-दक्खिण-पच्छिम चउदिसु विदिसासु विहरमाणेण, जुगंतर दिट्ठिणा, भव्वेण, दट्ठव्वा। पमाद दोसेण डवडव-चरियाए पाण-भूद-जीव-सत्ताणं उवघादो कदो वा कारिदो वा कीरंतो वा समणुमण्णिदो, तस्स मिच्छा मे दुक्कडं।

पापिष्ठेन दुरात्मना जड़धिया, मायाविना लोभिना,
रागद्वेष मलीमसेन मनसा, दुष्कर्म यन्निर्मितम्॥
त्रैलोक्याधिपते ! जिनेन्द्र ! भवतः श्रीपाद मूलेऽधुना,
निन्दापूर्व-महं जहामि सततं, निर्वर्तये कर्मणाम्॥१॥

जिनेन्द्रमुन्मूलित कर्मबन्धं, प्रणम्य सन्मार्गकृत स्वरूपम्।
अनन्तबोधादि भवंगुणौघं, क्रियाकलापं प्रकटं प्रवक्ष्ये॥२॥

लघुसिद्ध योगि भक्ति पेज नं. 178 पर पढ़े।

आचार्य वन्दना पेज नं. 262 पर पढ़े।

# श्री सिद्ध भक्ति

सिद्धा-नुद्धूत-कर्म-प्रकृति-समुदयान् साधितात्म-स्वभावान्,
वन्दे सिद्धि-प्रसिद्धयै तदनुपम-गुण-प्रग्रहाकृष्टि-तुष्टः।
सिद्धिः स्वात्मोपलब्धिः प्रगुण-गुण-गणोच्छादि-दोषापहाराद्,
योग्योपादान-युक्त्या दृषद् इह यथा हेम-भावोपलब्धिः। १।

नाभावः सिद्धि-रिष्टा न निज-गुण-हतिस्तत् तपोभिर्न युक्तेः,
अस्त्यात्मानादि-बद्धः स्व-कृतज-फल-भुक्-तत्-क्षयान् मोक्षभागी।
ज्ञाता दृष्टा स्वदेह प्रमिति-रूपसमाहार-विस्तार-धर्मा,
ध्रौव्योत्पत्ति-व्ययात्मा स्व-गुण-युत-इतो नान्यथा साध्य सिद्धिः। २।

स त्वन्तर्बाह्य-हेतु-प्रभव-विमल सद्दर्शन-ज्ञान चर्या-
संपद्धेति-प्रघात-क्षत दुरित-तयाव्यञ्जिताचिन्त्य-सारैः।
कैवल्यज्ञान-दृष्टि-प्रवर-सुख-महावीर्य सम्यक्त्वलब्धिः
ज्योति-र्वातायनादि-स्थिर-परम-गुणै-रद्भुतै-र्भासमानः। ३।

जानन् पश्यन् समस्तं सम-मनुपरतं संप्रतृप्यन् वितन्वन्,
धुन्वन् ध्वान्तं नितान्तं निचित-मनुपमं प्रीणयन्नीश भावम्।
कुर्वन् सर्व-प्रजाना-मपर-मभिभवन् ज्योति-रात्मानमात्मा-,
आत्मन्येवात्मनासौ क्षण-मुपजनयन् -सत् -स्वयंभूः प्रवृत्तः। ४।

छिन्दन् शेषा-नशेषान्-निगल-बल-कलीं-स्तै-रनन्त-स्वभावैः,
सूक्ष्मत्वाग्र्यावगाहागुरु-लघुक-गुणैः क्षायिकैः शोभमानः।
अन्यै-श्चान्य व्यपोह-प्रवण-विषय-संप्राप्ति-लब्धि-प्रभावै-
रूर्ध्वं-व्रज्या स्वभावात् समय-मुपगतो धाम्नि संतिष्ठतेऽग्रये। ५।

अन्याकाराप्ति-हेतुर्, न च भवति परो येन तेनाल्प-हीनः,
प्रागात्मोपात्त-देह-प्रति-कृति-रूचि-राकार एव ह्यमूर्तः।
क्षुत्-तृष्णा-श्वास-कास-ज्वर-मरण-जरानिष्ट-योग-प्रमोह-
व्यापत्त्याद्युग्र दुःख-प्रभव-भव-हतेः कोऽस्य सौख्यस्य माता॥६॥

आत्मोपादान-सिद्धं स्वय-मतिशय-वद्-वीत-बाधं विशालम्,
वृद्धि ह्रास-व्यपेतं विषय-विरहितं निःप्रतिद्वन्द्व-भावम्।
अन्य-द्रव्यानपेक्षं, निरुपममितं शाश्वतं सर्व-कालम्।
उत्कृष्टानन्त-सारं, परम-सुखमतस्तस्य सिद्धस्य जातम्। ७।

नार्थः क्षुत्-तृड्-विनाशाद् विविध-रस-युतै-रन्न-पानै-रशुच्या,
नास्पृष्टै-र्गन्ध-माल्यै-र्नहि मृदु-शयनै-र्ग्लानि-निद्राद्यभावात्।
आतंकार्ते-रभावे तदुपशमन - सद्भेष जानर्थ तावद्,
दीपा-नर्थक्य-वद् वा व्यपगत-तिमिरे दृश्यमाने समस्ते। ८।

तादृक्-सम्पत्-समेता विविध-नय-तपः संयम-ज्ञान-दृष्टि-
चर्या-सिद्धाः समन्तात् प्रवितत्-यशसो विश्व देवाधि-देवाः।
भूता भव्या भवन्तः सकल जगति ये स्तूयमाना विशिष्टैस्,
तान् सर्वान् नौम्यनन्तान् निजिग-मिषु-ररं तत्स्वरूपं त्रिसन्ध्यम्।९।

कृत्त्वा कायोत्सर्गं, चतुरष्ट दोष विरहितं सु परिशुद्धं।
अतिभक्ति संप्रयुक्तो, यो वंदते सो लघु लभते परं सुखम्॥

इच्छामि भन्ते ! सिद्धभत्ति-काउस्सग्गो कओ तस्सालोचेउं सम्मणाण-सम्मदंसण सम्मचरित्त जुत्ताणं, अट्ठ-विह-कम्म-विप्प-मुक्काणं, अट्ठ-गुण-सम्पण्णाणं, उड्ढलोय-मत्थयम्मि पयट्ठियाणं, तव-सिद्धाणं, णय सिद्धाणं, संजम सिद्धाणं, चरित्त सिद्धाणं, अतीताणागद-वट्टमाण-कालत्तय- सिद्धाणं, सव्व- सिद्धाणं, णिच्चकालं, अच्चेमि, पुज्जेमि, वन्दामि, णमस्सामि, दुक्खक्खओ, कम्मक्खओ, बोहिलाहो, सुगइ-गमणं, समाहि-मरणं, जिण-गुण-सम्पत्ति होदु मज्झं।

आत्मदेव को नमन

या देवो सर्व जीवेषु श्रद्धारूपेण संस्थिता।
नमस्तस्यै नमस्तस्यै नमस्तस्यै नमो नमः॥

# श्री चैत्य भक्ति

श्री गौतमादि पदमद्भुत पुण्य बन्ध,
मुद्योतिताखिल-ममौघ-मघप्रणाशम्।
वक्ष्ये जिनेश्वरमहं प्रणिपत्य तथ्यं,
निर्वाण कारण-मशेष जगद्धितार्थम्॥

जयति भगवान् हेमाम्भोज-प्रचार-विजृम्भिता-
वमर-मुकुट-च्छायोद्गीर्ण-प्रभा-परिचुम्बितौ।
कलुष-हृदया मानोद्भ्रांताः परस्पर-वैरिणः,
विगत कलुषाः पादौ यस्य प्रपद्य विशश्वसुः॥१॥

तदनु जयति श्रेयान्-धर्मः प्रवृद्ध-महोदयः,
कुगति-विपथ-क्लेशा-द्योसौ विपाशयति प्रजाः।
परिणत नयस्यांगी-भावाद् विविक्त-विकल्पितम्,
भवतु भवतस्त्रातृ त्रेधा जिनेन्द्र-वचोऽमृतम्॥२॥

तदनु जयताज्जैनी वित्तिः प्रभंग तरंगिणी,
प्रभव विगम ध्रौव्य-द्रव्य स्वभाव-विभाविनी।
निरुपम-सुखस्येदं द्वारं विघट्य निरर्गलम्,
विगत-रजसं मोक्षं देयान् निरत्यय-मव्ययम्॥३॥

अर्हत्-सिद्धाचार्योपाध्यायेभ्यस्तथा च साधुभ्यः।
सर्व-जगद्-वन्द्येभ्यो नमोऽस्तु सर्वत्र सर्वेभ्यः॥ ४॥
मोहादि-सर्व-दोषारि-घातकेभ्यः सदा हत-रजोभ्यः।
विरहित-रहस्-कृतेभ्यः पूजार्हेभ्यो नमोऽर्हद्भ्यः॥५॥

क्षान्त्यार्जवादि-गुण गण-सुसाधनं सकल-लोक-हित-हेतुम्।
शुभ-धामनि धातारं वंदे धर्मं जिनेन्द्रोक्तम्॥६॥

मिथ्याज्ञान-तमोवृत-लोकैक-ज्योति-रमित-गमयोगि।
सांगोपांग-मजेयं जैनं वचनं सदा वन्दे ॥७॥

भवन-विमान-ज्योति-र्व्यन्तर-नरलोक विश्व-चैत्यानि।
त्रिजग-दभिवन्दितानां त्रेधा वन्दे जिनेन्द्राणाम्॥८॥

भुवनत्रयेऽपि भुवनत्रयाधिपाभ्यर्च्य - तीर्थ-कर्तृणाम्।
वन्दे भवाग्नि-शान्त्यै विभवाना - मालयालीस्ताः॥९॥

इति पञ्च-महापुरुषाः प्रणुता जिनधर्म-वचन-चैत्यानि।
चैत्यालयाश्च विमलां दिशन्तु बोधिं बुध-जनेष्टाम्॥१०॥

अकृतानि कृतानि-चाप्रमेय-द्युतिमन्ति द्युतिमत्सु मन्दिरेषु।
मनुजामर-पूजितानि-वन्दे, प्रतिबिम्बानि जगत्त्रये जिनानाम्॥११॥

द्युति-मण्डल-भासुरांग-यष्टीः, प्रतिमा अप्रतिमा जिनोत्तमानाम्।
भुवनेषु विभूतये प्रवृत्ता, वपुषा प्राञ्जलि-रस्मि वन्दमानः ॥१२॥

विगतायुध-विक्रिया-विभूषाः प्रकृतिस्थाः कृतिनां जिनेश्वराणाम्।
प्रतिमाः प्रतिमा-गृहेषु, कान्त्याऽ-प्रतिमाः कल्मष-शान्तयेऽभिवन्दे ॥१३॥

कथयन्ति कषाय-मुक्ति-लक्ष्मीं परया शान्ततया भवान्तकानाम्।
प्रणमाम्यभिरूप-मूर्तिमन्ति, प्रतिरूपाणि विशुद्धये जिनानाम् ॥१४॥

यदिदं मम सिद्धभक्ति-नीतं, सुकृतं दुष्कृत-वर्त्म-रोधि तेन।
पटुना जिनधर्म एव, भक्ति-र्भव ताज्जन्मनि जन्मनि स्थिरा मे ॥१५॥

अर्हतां सर्वभावानां दर्शन - ज्ञान - सम्पदाम्।
कीर्तयिष्यामि चैत्यानि यथाबुद्धि विशुद्धये ॥१६॥
श्रीमद् - भवन - वासस्था स्वयं भासुर - मूर्तयः।
वन्दिता नो विधेयासुः प्रतिमाः परमां गतिम् ॥१७॥

यावन्ति सन्ति लोकेऽस्मिन्-नकृतानि कृतानि च।
तानि सर्वाणि चैत्यानि वन्दे भूयांसि भूतये ॥१८॥

ये व्यन्तर - विमानेषु स्थेयांसः प्रतिमागृहाः।
ते च संख्या-मतिक्रान्ताः सन्तु नो दोष-विच्छिदे ॥१९॥

ज्योतिषा - मथ लोकस्य भूतयेऽद्भुत - सम्पदः।
गृहाः स्वयम्भुवः सन्ति विमानेषु नमामि तान्॥२०॥

वन्दे सुर - किरीटाग्र-मणिच्छायाभिषेचनम्।
याः क्रमेणैव सेवन्ते तदर्च्चाः सिद्धि-लब्धये॥ २१॥

इति स्तुति पथातीत-श्रीभृता-मर्हतां मम।
चैत्यानामस्तु संकीर्तिः सर्वास्रव-निरोधिनी॥२२॥

अर्हन्-महा-नदस्य त्रिभुवन-भव्यजन-तीर्थ-यात्रिक-दुरितम्-
प्रक्षालनैक-कारणमति-लौकिक-कुहक-तीर्थ-मुत्तम-तीर्थम्॥२३॥

लोकालोक-सुतत्त्व-प्रत्यव-बोधन-समर्थ-दिव्यज्ञान-
प्रत्यह-वहत्प्रवाहं व्रत-शीलामल-विशाल-कूल-द्वितयम्॥२४॥

शुक्लध्यान-स्तिमित स्थित-राज-द्राजहंस-राजित मसकृत्।
स्वाध्याय-मन्द्रघोषं नाना-गुण-समिति-गुप्ति-सिकता-सुभगम्॥२५॥

क्षान्त्यावर्त-सहस्रं सर्व-दया-विकच-कुसुम-विलसल्लतिकम्।
दुःसह परीषहाख्य-द्रुततर-रंग-त्तरंग-भङ्गुर-निकरम्॥२६॥

व्यपगत-कषाय-फेनं राग-द्वेषादि-दोष-शैवल-रहितम्।
अत्यस्त-मोह-कर्दम-मतिदूर-निरस्त-मरण-मकर-प्रकरम्॥२७॥

ऋषि-वृषभ-स्तुति-मन्द्रोद्रेकित-निर्घोष-विविध-विहग-ध्वानम्।
विविध-तपोनिधि-पुलिनं सास्रव-संवरण-निर्जरा-निःस्रवणम्॥२८॥

गणधर-चक्र-धरेन्द्र-प्रभृति-महा-भव्य-पुण्डरीकैः पुरुषैः।
बहुभिः स्नातं भक्त्या कलि-कलुष-मलापकर्षणार्थ-ममेयम्॥२९॥

अवतीर्णवतः स्नातुं ममापि दुस्तर-समस्त-दुरितं दूरम्।
व्यपहरतु परम-पावन-मनन्य, जय्य-स्वभाव-भाव-गम्भीरम्॥३०॥

अताम्र-नयनोत्पलं सकल-कोप-वह्ने-र्जयात्।
कटाक्ष-शर-मोक्ष-हीन-मविकारतोद्रेकतः।
विषाद-मद-हानितः प्रहसितायमानं सदा,
मुखं कथयतीव ते हृदय-शुद्धि-मात्यन्तिकीम् ॥३१॥

निराभरण-भासुरं विगत-राग-वेगोदयात्,
निरम्बर-मनोहरं प्रकृति रूप निर्दोषतः।
निरायुध-सुनिर्भयं विगत-हिंस्य-हिंसा-क्रमात्,
निरामिष-सुतृप्ति-मद्-विविध-वेदनानां क्षयात्॥३२॥

मितस्थिति-नखांगजं गत-रजोमल-स्पर्शनं,
नवाम्बुरुह-चन्दन-प्रतिम-दिव्य-गन्धोदयम्।

रवीन्दु-कुलिशादि-दिव्य-बहु लक्षणालङ्कृतं,
दिवाकर-सहस्र-भासुर-मपीक्षणानां प्रियम् ॥३३॥

हितार्थ-परिपन्थिभिः प्रबल-राग-मोहादिभिः
कलंकितमना जनो यदभिवीक्ष्यशो शुद्ध्यते।
सदाभिमुख-मेव यज्जगति पश्यतां सर्वतः,
शरद् विमल-चन्द्र-मण्डल-मिवोत्थितं दृश्यते॥३४॥

तदेत-दमरेश्वर-प्रचल-मौलि-माला-मणि,
स्फुरत्-किरण-चुम्बनीय-चरणारविन्द-द्वयम्।
पुनातु भगवज्जिनेन्द्र तव रूप-मन्धीकृतम्,
जगत्-सकल-मन्यतीर्थ-गुरु-रूप-दोषोदयैः॥३५॥

क्षेपक श्लोकाः

मानस्तम्भाः सरांसि प्रविमलजल, सत्खातिका पुष्पावाटी।
प्राकारो नाट्यशाला द्वितयमुपवनं, वेदिकांत र्ध्वजाद्याः॥
शालः कल्पद्रुमाणां सुपरिवृत्तवनं, स्तूपहर्म्यावली च।
प्राकारःस्फाटिकोन्त-नृ-सुर-मुनिसभा,पीठिकाग्रेस्वयंभू।१।

वर्षेषु वर्षान्तर पर्वतेषु, नन्दीश्वरे यानि च मंदरेषु।
यावन्ति चैत्यायतनानि लोके,सर्वाणि वन्दे जिनपुंगवानाम्।२।

अवनितल-गतानां कृत्रिमाऽकृत्रिमाणाम्।
वन भवन गतानां दिव्य वैमानिकानाम्।
इह मनुज-कृतानां देव राजार्चितानाम्,
जिनवर-निलयानां भावतोऽहं स्मरामि॥३॥

जम्बू-धातकि-पुष्करार्ध-वसुधा-क्षेत्र-त्रये ये भवाश्-,
चंद्राम्भोज शिखण्डि कण्ठ-कनक-प्रावृंघनाभाजिनाः॥
सम्यग्ज्ञान-चरित्र-लक्षणधरा दग्धाष्ट-कर्मेन्धनाः,
भूतानागत-वर्तमान-समये तेभ्यो जिनेभ्यो नमः॥४॥

श्रीमन्मेरौ कुलाद्रौ, रजत गिरिवरे शाल्मलौ जम्बुवृक्षे,
वक्षारे चैत्यवृक्षे, रतिकर-रुचके कुण्डले मानुषांके॥
इष्वाकारेऽञ्जनाद्रौ, दधिमुख शिखरे व्यंतरे स्वर्गलोके।
ज्योतिर्लोकेऽभिवंदे, भुवनमहितले यानि चैत्यालयानि॥५॥

दौ कुन्देन्दुतुषारहार धवलौ द्वाविन्द्रनीलप्रभौ,
दौ बन्धूक समप्रभौ जिनवृषौ दौ च प्रियङ्गुप्रभौ।
शेषा षोडश जन्ममृत्युरहिताः सन्तप्त हेमप्रभास्-,
ते सज्ज्ञान दिवाकराः सुरनुताः सिद्धि प्रयच्छन्तु नः॥६॥

देवा सुरेन्द्र नर-नाग समर्चितेभ्यः, पाप-प्रणाशकर भव्य मनोहरेभ्यः।
घंटा ध्वजादि परिवार विभूषितेभ्यो, नित्यं नमो जगति सर्व जिनालयेभ्यः॥६॥

अञ्चलिका

इच्छामि भंते ! चेइय-भत्ति-काउस्सग्गो कओ तस्सालोचेउं। अहलोय-तिरियलोय-उड्ढलोयम्मि, किट्टिमा-किट्टिमाणि जाणि जिणचेइयाणि ताणि सव्वाणि तीसु वि लोएसु भवणवासिय- वाणविंतर- जोइसिय- कप्पवासियत्ति चउविहा देवा सपरिवारा दिव्वेण ण्हाणेण, दिव्वेण गंधेण, दिव्वेण अक्खेण, दिव्वेण पुप्फेण, दिव्वेण चुण्णेण, दिव्वेण दीवेण, दिव्वेण धूवेण, दिव्वेण वासेण, णिच्चकालं अच्चंति, पुज्जंति, वंदंति, णमस्संति अहमवि इह संतो तत्थ संताइं सया णिच्चकालं अच्चेमि, पुज्जेमि, वंदामि, णमस्सामि, दुक्खक्खओ, कम्मक्खओ, बोहिलाहो, सुगइगमणं, समाहि-मरणं, जिण-गुण-सम्पत्ति होउ-मज्झं।

॥ इति चैत्य भक्तिः॥

अहोरात्रि के कृतिकर्म

चत्तारी पडिक्कमणे, किदियम्मो तिण्णि होंति सज्झाए
पुव्वण्हे अवरण्हे किदियम्मा, चोद्दसा होंति ॥मू०6021॥

स्वाध्याये द्वादशेष्टा षड्-वन्दनेष्टौप्रतिक्रमे।
कायोत्सर्गा योगभक्तौद्वौ चाहोरात्र-गोचराः॥

# श्री श्रुत भक्ति

स्तोष्ये संज्ञानानि परोक्ष - प्रत्यक्ष - भेद - भिन्नानि।
लोकालोक-विलोकन-लोलित-सल्लोक-लोचनानि सदा॥१॥

अभिमुख-नियमित-बोधन-माभिनिबोधिक-मनिन्द्रियेद्रिंयजम्।
बह्वाद्यवग्रहादिक-कृत-षट्त्रिंशत्-त्रिशत-भेदम्॥२॥

विविधर्द्धि-बुद्धि-कोष्ठ-स्फुट-बीज-पदानुसारि-बुद्ध्यधिकम्।
संभिन्न - श्रोतृ - तया, सार्धं श्रुतभाजनं वन्दे॥३॥

श्रुतमपि-जिनवर-विहितं गणधर-रचितं द्व्यनेक-भेदस्थम्
अंगांगबाह्य - भावित - मनन्त-विषयं नमस्यामि॥४॥

पर्यायाक्षर - पद - संघात - प्रतिपत्तिकानुयोग-विधीन्।
प्राभृतक - प्राभृतकं प्राभृतकं वस्तु - पूर्वं च॥५॥

तेषां समासतोऽपि च विंशति,-भेदान् समश्नुवानं तत्।
वन्दे द्वादशधोक्तं गम्भीर - वर - शास्त्र-पद्धत्या॥६॥

आचारं सूत्रकृतं स्थानं समवाय - नामधेयं च।
व्याख्या - प्रज्ञप्तिं च ज्ञातृकथोपासकाध्ययने॥७॥

वन्देऽन्तकृद्दश - मनुत्तरोपपादिक दशं दशावस्थम्।
प्रश्नव्याकरणं हि विपाकसूत्रं च विनमामि॥८॥

परिकर्म च सूत्रं च स्तौमि प्रथमानुयोग-पूर्वगते।
सार्द्धं चूलिकयापि च, पंचविधं दृष्टिवादं च॥९॥

पूर्वगतं तु चतुर्दशधोदित, -मुत्पादपूर्व-माद्यमहम्।
आग्रायणीय - मीडे पुरु - वीर्यानुप्रवादं च॥१०॥

संततमह-मभिवन्दे तथास्ति - नास्ति प्रवादपूर्वं च।
ज्ञानप्रवाद - सत्यप्रवाद - मात्मप्रवादं च॥११॥

कर्मप्रवाद - मीडेऽथ - प्रत्याख्यान - नामधेयं च।
दशमं विद्याधारं पृथुविद्यानुप्रवादं च॥१२॥

कल्याण - नामधेयं प्राणावायं क्रियाविशालं च।
अथ लोकबिंदुसारं वन्दे लोकाग्रसार पदम्॥१३॥

दश च चतुर्दश चाष्टावष्टादश च द्वयो-र्द्विषट्कं च।
षोडश च विंशतिं च त्रिंशतमपि पञ्चदश च तथा॥१४॥

वस्तूनि दश दशान्येष्वनुपूर्वं भाषितानि पूर्वाणाम्।
प्रतिवस्तु प्राभृतकानि विंशतिं विंशतिं नौमि॥१५॥

पूर्वान्तं ह्यपरान्तं ध्रुव - मध्रुव-च्यवन लब्धि-नामानि।
अध्रुव - सम्प्रणिधिं चाप्यर्थं भौमावयाद्यं च॥१६॥

सर्वार्थ - कल्पनीयं ज्ञानमतीतं त्वनागतं कालम्।
सिद्धि-मुपाध्यं च तथा चतुर्दश-वस्तूनि द्वितीयस्य॥१७॥

पञ्चमवस्तु - चतुर्थं - प्राभृतकस्यानुयोग - नामानि।
कृतिवेदने तथैव स्पर्शन - कर्मप्रकृतिमेव॥१८॥

बन्धन-निबन्धन-प्रक्रमानुपक्रम-मथाभ्युदय-मोक्षौ।
सङ्क्रमलेश्ये च तथा लेश्यायाः कर्म-परिणामौ॥१९॥

सात - मसातं दीर्घं ह्रस्वं भवधारणीय - संज्ञं च।
पुरुपुद्गलात्मनाम च निधत्त-मनिधत्त-मभिनौमि॥२०॥

सनिकाचित-मनिकाचित-मथ-कर्मस्थितिकपश्चिमस्कंधौ।
अल्पबहुत्वं च यजे तद्द्वाराणां चतुर्विंशम्॥२१॥

कोटीनां द्वादश शत - मष्टापञ्चाशतं सहस्त्राणाम्।
लक्षत्र्यशीति-मेव च पञ्च च वन्दे श्रुतपदानि॥२२॥

षोडश शतं चतुस्त्रिंशत् कोटीनां त्र्यशीति-लक्षाणि !
शतसंख्याष्टा सप्तति-मष्टाशीतिं च पद-वर्णान्॥२३॥

सामायिकं चतुर्विंशति - स्तवं वन्दना प्रतिक्रमणम्।
वैनयिकं कृतिकर्म च पृथु-दशवैकालिकं च तथा॥२४॥

वर-मुत्तराध्ययन मपि कल्पव्यवहार - मेव - मभिवन्दे।
कल्पाकल्पं स्तौमि महाकल्पं पुण्डरीकं च॥२५॥

परिपाट्या प्रणिपतितोऽस्म्यहं महापुण्डरीकनामैव।
निपुणान्यशीतिकं च प्रकीर्णकान्यंग-बाह्यानि॥२६॥

पुद्गल - मर्यादोक्तं प्रत्यक्षं सप्रभेद - मवधिं च।
देशावधि - परमावधि - सर्वावधि - भेद - मभिवन्दे॥२७॥

परमनसि स्थितमर्थं मनसा परिविद्य मन्त्रि-महित-गुणम्।
ऋजु-विपुलमति-विकल्पं स्तौमि मनः पर्ययज्ञानम्॥२८॥

क्षायिक-मनन्त-मेकं त्रिकाल-सर्वार्थ-युगपदवभासम्।
सकल - सुख - धाम सततं वन्देऽहं केवलज्ञानम्॥२९॥

एवमभिष्टुवतो मे ज्ञानानि समस्त-लोक-चक्षूंषि।
लघु भवताज्ज्ञानर्द्धि-र्ज्ञानफलं सौख्य-मच्यवनम्॥३०॥

अञ्चलिका

इच्छामि भंते ! सुदभत्ति-काउस्सग्गो कओ तस्सालोचेउं, अंगोवंग-पइण्णए पाहुडय-परियम्म सुत्त-पढमाणिओग-पुव्वगय-चूलिया चेव सुत्तत्थय-थुइ-धम्मकहाइयं णिच्चकालं अच्चेमि, पुज्जेमि, वंदामि, णमस्सामि, दुक्खक्खओ, कम्मक्खओ बोहिलाहो सुगइगमणं, समाहि-मरणं, जिण-गुण-संपत्ति होदु मज्झं।

॥ इति श्रुतभक्तिः॥

# श्री चारित्र भक्ति

शार्दूलविक्रीडित छंदः

येनेन्द्रान् भुवन - त्रयस्य विलसत्-केयूर-हारांगदान्,
भास्वन्-मौलि- मणिप्रभा-प्रविसरोत्-तुंगोत्तमांगान्नतान्।
स्वेषां पाद - पयोरुहेषु मुनयश्चक्रुः प्रकामं सदा,
वन्दे पञ्चतयं तमद्य निगदन्-नाचार-मभ्यर्चितम्॥१॥

अर्थ-व्यञ्जन-तद्द्वया-विकलता-कालोपधा-प्रश्रयाः,
स्वाचार्याद्यनपह्नवो बहु-मति-श्चेत्यष्टधा व्याहृतम्।
श्री-मज्ज्ञाति-कुलेन्दुना भगवता तीर्थस्य कर्त्राऽञ्जसा,
ज्ञानाचार-महं त्रिधा प्रणिपताभ्युद्धूतये कर्मणाम्॥२॥

शंका-दृष्टि-विमोह-काङ्क्षणविधि-व्यावृत्ति-सन्नद्धतां,
वात्सल्यं विचिकित्सना-दुपरतिं धर्मोपबृह्म-क्रियाम्।
शक्त्या शासन-दीपनं हित-पथाद् भ्रष्टस्य संस्थापनं,
वन्दे दर्शन-गोचरं सुचरितं मूर्ध्ना नमन्नादरात्॥३॥

एकान्ते शयनोपवेशन - कृतिः संतापनं तानवम्,
संख्या-वृत्ति-निबन्धना - मनशनं विष्वाण-मर्द्धोदरम्।
त्यागं चेन्द्रिय-दन्तिनो मदयतः स्वादो रसस्यानिशम्,
षोठा बाह्य-महं स्तुवे शिव गति-प्राप्त्यभ्युपायं तपः॥४॥

स्वाध्यायः शुभकर्मणश्-च्युतवतः संप्रत्यवस्थापनम्,
ध्यानं व्यापृतिरामयाविनि गुरौ, वृद्धे च बाले यतौ॥
कायोत्सर्जन सत्क्रिया विनय-इत्येवं तपः षड्विधं,
वन्देऽभ्यन्तर-मन्तरंग बलवद्-विद्वेषि विध्वंसनम्॥५॥

सम्यग्ज्ञान विलोचनस्य दधतः, श्रद्धान - मर्हन्मते,
वीर्यस्याविनिगूहनेन तपसि, स्वस्य प्रयत्नाद्यतेः॥
या वृत्तिस्तरणीव नौरविवरा, लध्वी भवोदन्वतो,
वीर्याचारमहं तमूर्जित गुणं, वन्दे सतामर्चितम्॥६॥

तिस्रः सत्तम गुप्तयस्तनुमनो, भाषानिमित्तोदयाः,
पञ्चेर्यादि-समाश्रयाः समितयः पञ्च व्रतानीत्यपि।
चारित्रोपहितं त्रयोदशतयं पूर्वं न दृष्टं परै-
राचारं परमेष्ठिनो जिनपतेर्-वीरं नमामो वयम्॥७॥

आचारं सह - पञ्चभेद - मुदितं, तीर्थं परं मंगलम्,
निर्ग्रन्थानपि सच्चरित्रमहतो, वन्दे समग्रान्यतीन्।
आत्माधीन सुखोदया मनुपमां, लक्ष्मी-मविध्वंसिनीम्-
इच्छन्केवल दर्शनावगमन, प्राज्य प्रकाशोज्ज्वलाम्॥८॥

अज्ञानाद्यदवीवृतं नियमिनोऽवर्तिष्यहं चान्यथा,
तस्मिन् नर्जित मस्यति प्रतिनवं चैनो निराकुर्वति।

वृत्ते सप्ततयीं निधिं सुतपसा-मृद्धिं नयत्यद्भुतं,
तन्मिथ्या गुरुदुष्कृतं भवतु मे स्वं निंदितो निंदितम्॥९॥

संसार-व्यसनाहति प्रचलिता, नित्योदय प्रार्थिनः,
प्रत्यासन्न विमुक्तयः सुमतयः, शान्तैनसः प्राणिनः।
मोक्षस्यैव कृतं विशाल-मतुलं, सोपान मुच्चैस्तरा-
मारोहन्तु चरित्र-मुत्तम-मिदं, जैनेन्द्र-मोजस्विनः॥१०॥

अञ्चलिका

इच्छामि भन्ते ! चारित्त भत्ति काउस्सग्गो कओ, तस्स आलोचेउं सम्मणाणजोयस्स सम्मत्ताहिट्ठियस्स, सव्वपहाणस्स, णिव्वाणमग्गस्स, कम्मणिज्जर-फलस्स, खमाहारस्स, पञ्चमहव्वय सम्पण्णस्स, तिगुत्तिगुत्तस्स, पञ्चसमिदिजुत्तस्स, णाणज्झाण साहणस्स, समया इव पवेसयस्स, सम्मचारित्तस्स णिच्चकालं, अच्चेमि, पुज्जेमि, वंदामि, णमस्सामि, दुक्खक्खओ कम्मक्खओ बोहिलाहो सुगइगमणं, समाहिमरणं जिणगुण संपत्ति होउ मज्झं।

॥ इति श्री चारित्र भक्तिः ॥

बृहदालोचना पेज नं. 167 पर पढ़ें।

# श्री योगि भक्ति

जाति जरोरुरोग मरणातुर, शोक सहस्त्रदीपिताः,
दुःसहनरकपतन सन्त्रस्तधियः प्रतिबुद्धचेतसः।
जीवितमंबु बिंदुचपलं, तडिदभ्रसमा विभूतयः,
सकलमिदंविचिन्त्यमुनयः, प्रशमायवनान्तमाश्रिताः॥१॥
व्रत समिति गुप्ति संयुताः, शमसुखमाधाय मनसि वीतमोहाः।
ध्यानाध्ययनवशंगताः, विशुद्धये कर्मणां तपश्चरन्ति॥२॥
दिनकर किरणनिकरसंतप्त, शिलानिचयेषु निष्पृहाः,
मलपटलावलिप्त तनवः, शिथिली कृतकर्म बंधनाः।
व्यपगतमदनदर्प रतिदोष, कषाय विरक्त मत्सराः,
गिरिशिखरेषु चंडकिरणाभि, मुखस्थितयो दिगम्बराः॥३॥
सज्ज्ञानामृतपायिभिः क्षान्तिपयः सिञ्च्यमानपुण्यकायैः।
धृतसंतोषच्छत्रकैः, तापस्तीव्रोऽपि सह्यते मुनीन्द्रैः॥४॥
शिखिगल कज्जलालिमलिनै, र्विबुधाधिपचाप चित्रितैः,
भीमरवैर्विसृष्टचण्डा, शनि, शीतल वायु वृष्टिभिः।
गगनतलं विलोक्य जलदैः, स्थगितं सहसा तपोधनाः,
पुनरपि तरुतलेषु विषमासु, निशासु विशंकमासते॥५॥

जलधाराशरताडिता, न चलन्ति चरित्रतः सदा नृसिंहाः।
संसार दुःख भीरवः, परीषहा राति-घातिनः प्रवीराः॥६॥
अविरतबहल तुहिनकण, वारिभिरंघ्रिपपत्र पातनै-,
रनवरतमुक्तसात्कारवैः, पुरुषैरथानिलैः शोषितगात्रयष्टयः।
इह श्रमणा धृतिकंबलावृताः शिशिरनिशां,
तुषार विषमां गमयन्ति, चतुःपथे स्थिताः॥७॥
इति योगत्रयधारिणः, सकलतपशालिनः प्रवृद्धपुण्यकायाः।
परमानंदसुखैषिणः, समाधिमग्रयं दिशंतु नो भदंताः॥८॥
योगीश्वरान् जिनान्सर्वान् योगिनिर्धूत कल्मषान्।
योगैस्त्रिभिरहं वंदे, योगस्कंध प्रतिष्ठितान्॥९॥

## क्षेपक श्लोकानि

प्रावट्-काले सविद्युत्-प्र-पतित, सलिले वृक्ष-मूलाधिवासाः,
हेमन्ते रात्रि-मध्ये प्रति-विगत-भयाः काष्ठ-वत्-व्यक्त देहाः।
ग्रीष्मे सूर्यांशु-तप्ता-गिरि-शिखर-गताः स्थान-कूटांतर-स्थास्-,
ते मे धर्मं प्रदद्युर्मुनि, गण-वृषभा मोक्ष-निःश्रेणि-भूताः॥१॥
गिम्हे गिरि-सिहरत्था वरिसा-याले रुक्ख-मूल-रयणीसु।
सिसिरे वाहिर-सयणा ते साहू वंदिमो णिच्चं॥२॥
गिरि-कन्दर-दुर्गेषु ये वसन्ति दिगम्बराः।
पाणि-पात्र-पुटाहारा-स्ते यांति परमां गतिम्॥३॥

अञ्चलिका

इच्छामिभन्ते ! योगि-भक्ति-काउस्सग्गो कओ, तस्सालोचेउं अड्ढाइज्ज-दीव-दो-समुद्देसु, पण्णारस-कम्म-भूमिसु, आदावण- रुक्ख-मूलअब्भोवास- ठाणमोण-वीरासणेक्क पास कुक्कुडासण चउ-छ-पक्खखवणादि जोगजुत्ताणं, सव्वसाहूणं णिच्चकालं, अच्चेमि, पुज्जेमि, वंदामि णमंसामि, दुक्खक्खओ, कम्मक्खओ, बोहिलाओ, सुगइगमणं, समाहिमरणं, जिणगुणसंपत्ति होउ मज्झं।

## श्री पञ्चमहागुरु भक्ति

श्रीमदमरेन्द्र-मुकुट-प्रघटित-, मणि-किरण-वारि-धाराभिः।
प्रक्षालित-पद-युगलान्, प्रणमामि जिनेश्वरान् भक्त्या॥१॥
अष्टगुणैः समुपेतान्, प्रणष्ट-दुष्टाष्ट-कर्मरिपु-समितीन्।
सिद्धान् सतत-मनन्तान्-नमस्करो मीष्ट तुष्टि संसिद्ध्यै॥२॥
साचार-श्रुत-जलधीन्-प्रतीर्य शुद्धोरुचरण-निरतानाम्।
आचार्याणां पदयुग-कमलानि दधे शिरसि मेऽहम्॥३॥
मिथ्या-वादि-मद्रोग्र-ध्वान्त-प्रध्वन्सि-वचन-संदर्भान्।
उपदेशकान् प्रपद्ये मम दुरितारि-प्रणाशाय॥४॥
सम्यग्दर्शन - दीप - प्रकाशका- मेय- बोध-सम्भूताः।
भूरि-चरित्र-पताकास्-ते साधु-गणास्तु मां पान्तु॥५॥

जिन-सिद्ध-सूरि-देशक-साधु-वरानमल गुण गणोपेतान्।
पञ्चनमस्कार-पदै-स्-त्रि-सन्ध्य-मभिनौमि मोक्ष-लाभाय।६।
एषः पञ्च नमस्कारः, सर्व पाप प्रणाशनः।
मंगलानां च सर्वेषां, प्रथमं मंगलं भवेत्॥७॥
अर्हत्सिद्धाचार्योपाध्यायाः सर्वसाधवः।
कुर्वन्तु मंगलाः सर्वे, निर्वाण परमश्रियम्॥८॥
सर्वान् जिनेन्द्र चन्द्रान, सिद्धानाचार्य पाठकान् साधून्।
रत्नत्रयं च वन्दे, रत्नत्रय सिद्धये भक्त्या॥९॥
पांतु श्रीपाद पद्मानि, पञ्चानां परमेष्ठिनां।
लालितानि सुराधीश, चूडामणि मरीचिभिः॥१०॥
प्रातिहार्यैर्जिनान् सिद्धान्, गुणैः सूरीन् स्वमातृभिः।
पाठकान् विनयैः साधून्, योगांगै-रष्टभिः स्तुवे॥११॥

अञ्चलिका

इच्छामि भन्ते ! पंचमहागुरु-भत्ति-काउस्सग्गो कओ तस्सालोचेउं, अट्ठ-महा-पाडिहेर-संजुत्ताणं, अरहंताणं, अट्ठ गुण-सम्पण्णाणं, उड्ढलोय मत्थयम्मि पइट्ठियाणं, सिद्धाणं, अट्ठ-पवय-णमउ संजुत्ताणं आइरियाणं, आयारादि सुदणाणोवदेसयाणं उवज्झायाणं, ति-रयण-गुण पालण-रदाणं सव्वसाहूणं, सया णिच्चकालं अच्चेमि, पुज्जेमि, वंदामि, णमस्सामि, दुक्खक्खओ, कम्मक्खओ, बोहिलाहो, सुगइ-गमणं, समाहि-मरणं, जिण-गुण-सम्पत्ति होउ मज्झं।

॥ इति पञ्च गुरु भक्तिः ॥

# श्री शांति भक्ति

न स्नेहाच्छरणं प्रयान्ति भगवन् ! पादद्वयं ते प्रजाः,
हेतुस्तत्र विचित्र दुःख निचयः संसार घोरार्णवः।
अत्यन्त स्फुरदुग्र रश्मि निकर-व्याकीर्ण भूमण्डलो,
ग्रैष्मः कारयतीन्दु पाद सलिल-च्छायानुरागं रविः॥१॥

क्रुद्धाशीर्विष-दष्ट दुर्जय विष-ज्वालावली विक्रमो,
विद्या-भेषज मन्त्र तोय हवनै-र्याति प्रशान्तिं यथा।
तद्-वत्ते चरणारुणाम्बुज युग स्तोत्रोन्मुखानां नृणाम्,
विघ्नाः काय विनायकाश्च सहसा शाम्यन्त्यहो विस्मयः॥२॥

सन्तप्तोत्तम काञ्चन क्षितिधर-श्री स्पर्द्धि गौरद्युते,
पुंसां त्वच्चरण-प्रणाम करणात् पीडाः प्रयान्तिक्षयं।
उद्यद्भास्कर विस्फुरत्कर शतव्याघात निष्कासिता,
नाना देहि विलोचन-द्युतिहरा शीघ्रं यथा शर्वरी॥३॥

त्रैलोक्येश्वर भंग लब्ध विजयादत्यन्त रौद्रात्मकान्,
नाना जन्म शतान्तरेषु पुरतो जीवस्य संसारिणः।
को वा प्रस्खलतीह केन विधिना कालोग्र दावानलान्,
न स्याच्चेत्तव पाद पद्म युगल स्तुत्यापगा वारणम्॥४॥

लोकालोक निरन्तर प्रवितत् ज्ञानैक मूर्त्ते विभो !,
नाना रत्न पिनद्ध दण्ड रुचिर श्वेतात पत्रत्रय।
त्वत्पादद्वय पूत गीतरवतः शीघ्रं द्रवन्त्यामया,
दर्पाध्मात मृगेन्द्र भीम निनदाद् वन्या यथा कुञ्जराः ॥५॥

दिव्य स्त्री नयनाभिराम विपुल श्री मेरु चूडामणे,
भास्वद् बाल दिवाकर-द्युति हर प्राणीष्ट भामण्डल।
अव्याबाध - मचिन्त्यसार - मतुलं त्यक्तोपमं शाश्वतं,
सौख्यं त्वच्चरणारविन्द युगल स्तुत्यैव सम्प्राप्यते॥६॥

यावन्नोदयते प्रभा परिकरः श्रीभास्करो भासयंस्,
तावद् धारयतीह पंकजवनं निद्रातिभार श्रमम्।
यावत्त्वच्चरण द्वयस्य भगवन् ! न स्यात् प्रसादोदयस्-
तावज्जीव निकाय एष वहति प्रायेण पापं महत्॥७॥

शान्तिं शान्ति जिनेन्द्र शान्त मनसस - त्वत्पाद पद्माश्रयात्,
संप्राप्ताः पृथिवी तलेषु बहवः शान्त्यर्थिनः प्राणिनः।
कारुण्यान् मम भक्तिकस्य च विभो ! दृष्टिं प्रसन्नां कुरु,
त्वत्पादद्वय दैवतस्य गदतःशान्त्यष्टकं भक्तितः॥८॥

शान्ति जिनं शशि निर्मल वक्त्रं, शीलगुण व्रत संयम पात्रम्।
अष्टशतार्चित लक्षण गात्रं, नौमि जिनोत्तम मम्बुज नेत्रम्॥९॥

पञ्चम मीप्सित-चक्रधराणां, पूजित-मिन्द्र-नरेन्द्र-गणैश्च।
शान्तिकरं गण-शान्ति-मभीप्सुः, षोडश-तीर्थंकरं-प्रणमामि॥१०॥

दिव्यतरुः सुर-पुष्प-सुवृष्टि-, र्दुन्दुभि - रासन-योजन घोषौ।
आतप-वारण-चामर-युग्मे, यस्य विभाति च मण्डल तेजः॥११॥

तं जगदर्चित-शान्ति-जिनेन्द्रं, शान्तिकरं शिरसा प्रणमामि।
सर्व गणाय तु यच्छतु शान्तिं, मह्यमरं पठते परमां च॥१२॥

येऽभ्यर्चिता मुकुट-कुण्डल-हार-रत्नैः,
शक्रादिभिः सुरगणैः स्तुत-पादपद्माः।
ते मे जिनाः प्रवर-वंश-जगत्प्रदीपाः,
तीर्थंकराः सतत शान्तिकरा भवन्तु॥१३॥

सम्पूजकानां प्रतिपालकानां,
यतीन्द्र-सामान्य-तपोधनानाम्।
देशस्य राष्ट्रस्य पुरस्य राज्ञः,
करोतु शांतिं भगवान्-जिनेन्द्रः॥१४॥

क्षेमं सर्वप्रजानां प्रभवतु, बलवान् धार्मिको भूमिपालः।
काले-कालेच सम्यग् वितरतु मघवा, व्याधयो यान्तु नाशम्।
दुर्भिक्षं चौरमारिः क्षणमपि जगतां, मास्मभूज्जीव-लोके।
जैनेन्द्रं धर्मचक्रम् प्रभवतु सततं, सर्व-सौख्य-प्रदायि ॥१५॥

तद् द्रव्य मव्यय मुदेतु शुभ स देशः,
संतन्यतां प्रतपतां सततं सकालः।
भावः स नन्दतु सदा यदनुग्रहेण,
रत्नत्रयं प्रतपतीह मुमुक्षुवर्गे ॥१६॥

प्रध्वस्त घाति कर्माणः, केवल ज्ञान भास्कराः।
कुर्वन्तु जगतां शान्तिं, वृषभाद्या जिनेश्वराः ॥१७॥

क्षेपक श्लोकानिः

शांति शिरोधृत जिनेश्वर शासनानां,
शान्तिः निरन्तर तपोभव भावितानां।
शान्तिः कषाय जय जृम्भित वैभवानां,
शान्तिः स्वभाव महिमान् मुपागतानाम् ॥१॥

जीवन्तु संयम सुधारस पान तृप्ता,
नंदंतु शुद्ध सहसोदय सुप्रसन्नाः।
सिद्ध्यंतु सिद्धि सुख संगकृताभियोगाः,
तीव्रं तपन्तु जगतां त्रितयेऽर्हदाज्ञा॥२॥

शान्तिः शम्तनुताम् समस्त जगतः, संगच्छतां धार्मिकैः,
श्रेयः श्री परिवर्धतां नयधरा, धुर्यो धरित्री पतिः।
सद्विद्या-रसमुद्गिरन्तु कवयो, नामाप्य धस्यास्तु मां,
प्रार्थ्यं वा कियदेक एव, शिवकृद्धर्मो जयत्वर्हताम्॥३॥

इच्छामि भन्ते ! संतिभत्ति-काउस्सग्गो कओ, तस्सालोचेउं, पञ्च-महा-कल्लाण-संपण्णाणं, अट्ठ-महापा-डिहेर-सहियाणं, चउतीसातिसय-विसेस-संजुत्ताणं, बत्तीस-देवेंद-मणिमय-मउड-मत्थय-महियाणं बलदेव वासुदेव-चक्कहर-रिसि-मुणि-जदि-अणगारोव गूढ़ाणं, थुइ-सय-सहस्स-णिलयाणं, उसहाइ-वीर- पच्छिम-मंगल -महापुरिसाणं णिच्चकालं, अच्चेमि, पूजेमि, वंदामि, णमस्सामि, दुक्खक्खओ, कम्मक्खओ, बोहिलाओ, सुगइगमणं, समाहि-मरणं जिण-गुण सम्पत्ति होदु मज्झं।

# श्री समाधि भक्ति

स्वात्माभिमुख - संवित्ति, लक्षणं श्रुत - चक्षुषा।
पश्यन्पश्यामि देव त्वां, केवलज्ञान-चक्षुषा॥१॥

शास्त्राभ्यासो जिनपति-नुतिः, संगति सर्वदार्यैः।
सद्वृत्तानां गुणगण-कथा, दोषवादे च मौनम्॥
सर्वस्यापि प्रियहितवचो, भावना चात्मतत्त्वे।
संपद्यन्तां मम भव - भवे यावदेतेऽपवर्गः॥२॥

जैनमार्गरुचि-रन्यमार्ग निर्वेगता, जिनगुण स्तुतौ मतिः।
निष्कलंक विमलोक्ति भावनाः, संभवन्तु मम जन्म-जन्मनि॥३॥

गुरुमूले यति-निचिते-चैत्यसिद्धान्त वार्धि सद्घोषे।
मम भवतु जन्म जन्मनि, सन्यसन समन्वितं मरणम्॥४॥
जन्मजन्मकृतं पापं, जन्मकोटि समार्जितम्।
जन्ममृत्युजरामूलं, हन्यते जिनवंदनात्॥५॥

आबाल्याज्-जिनदेवदेव ! भवतः, श्री पादयोः सेवया,
सेवासक्त विनेय कल्पलतया, कालोऽद्ययावद्गतः।
त्वां तस्याः फलमर्थये तदधुना, प्राण प्रयाणक्षणे,
त्वन्नाम प्रतिबद्ध वर्ण पठने, कण्ठोऽस्त्वकुण्ठो मम॥६॥

तवपादौ मम हृदये, मम हृदयं तव पदद्वये लीनम्।
तिष्ठतु जिनेन्द्र ! तावद्यावन् निर्वाण संप्राप्ति॥७॥

एकापि समर्थेयं, जिन भक्ति-दुर्गतिं निवारयितुम्।
पुण्यानि च पूरयितुं, दातुं मुक्तिश्रियं कृतिनः॥८॥

पञ्च अरिंजयणामे पञ्च, य मदि-सायरे जिणेवन्दे।
पञ्च जसोयरणामे, पञ्चय सीमंदरे वन्दे॥९॥

रयणत्तयं च वंदे, चउवीस जिणे च सव्वदा वंदे।
पञ्चगुरूणां वंदे, चारणचरणं सदा वंदे॥१०॥

अर्हमित्यक्षरं ब्रह्म, वाचकं परमेष्ठिनः।
सिद्धचक्रस्य सद्बीजं, सर्वतः प्रणिदध्महे॥११॥

कर्माष्टक विनिर्मुक्तं, मोक्षलक्ष्मी निकेतनम्।
सम्यक्त्वादि गुणोपेतं, सिद्धचक्रं नमाम्यहम्॥१२॥

आकृष्टिं सुरसंपदां विदधते, मुक्तिश्रियो वश्यता-
मुच्चाटं विपदां चतुर्गति भुवां, विद्वेष मात्मैनसाम्।
स्तम्भं दुर्गमनं प्रति-प्रयततो, मोहस्य सम्मोहनं,
पायात्पञ्च नमस् क्रियाक्षरमयी, साराधना देवता॥१३॥

अनन्तानन्त संसार, संततिच्छेद कारणम्।
जिनराज पदाम्भोज, स्मरणं शरणं मम॥१४॥

अन्यथा शरणं नास्ति, त्वमेव शरणं मम।
तस्मात् कारुण्य भावेन, रक्ष-रक्ष जिनेश्वर ! ॥१५॥

नहित्राता नहित्राता, नहित्राता जगत्त्रये।
वीतरागात्परो देवो, न भूतो न भविष्यति॥१६॥

जिनेभक्ति - र्जिनेभक्ति - र्जिनेभक्ति - र्दिने-दिने।
सदामेऽस्तु सदामेऽस्तु, सदामेऽस्तु भवे-भवे॥१७॥

याचेऽहं-याचेऽहं, जिन ! तव चरणारविंदयोर्भक्तिम्।
याचेऽहं - याचेऽहं, पुनरपि तामेव-तामेव॥१८॥

विघ्नौघाः प्रलयं यान्ति, शाकिनी-भूत पन्नगाः।
विषो निर्विषतां याति, स्तूयमाने जिनेश्वरे॥१९॥

अञ्चलिका

इच्छामि भंते ! समाहिभत्ति काउस्सग्गो कओ तस्सालोचेउं, रयणत्तय-सरूव-परमप्प-ज्झाण लक्खणं समाहि-भत्तीये णिच्चकालं अच्चेमि, पुज्जेमि, वंदामि, णमस्सामि, दुक्खक्खओ, कम्मक्खओ, बोहिलाहो, सुगइगमणं, समाहिमरणं, जिणगुण संपत्ति होउ मज्झं।

॥ इति समाधिभक्तिः ॥

# श्री नन्दीश्वर भक्ति

आर्यागीतिका छन्दः

त्रिदशपति मुकुट तट गतमणि, गणकर निकर सलिल धाराधौत।
क्रमकमल युगल जिनपति रुचिर, प्रतिबिम्ब विलय विरहित निलयान्॥१॥

निलयानहमिह महसां सहसा, प्रणिपतन पूर्व-मवनौम्यवनौ।
त्रय्यां त्रय्या शुद्ध्या निसर्ग, शुद्धान्विशुद्धये घनरजसाम्॥२॥

भावनसुर-भवनेषु, द्वासप्तति शत-सहस्र-संख्याभ्यधिकाः।
कोट्यः सप्त प्रोक्ता, भवनानां भूरि-तेजसां भुवनानाम्॥३॥

त्रिभुवन-भूत-विभूनां, संख्यातीतान्यसंख्य-गुण-युक्तानि।
त्रिभुवन-जन-नयन-मनः, प्रियाणि भवनानि भौम-विबुध-नुतानि॥४॥

यावन्ति सन्ति कान्त-ज्योति-र्लोकाधिदेवताभिनुतानि।
कल्पेऽनेक-विकल्पे, कल्पातीतेऽहमिन्द्र-कल्पानल्पे॥५॥

विंशतिरथ त्रि-सहिता, सहस्र-गुणिता च सप्तनवतिः प्रोक्ता।
चतुरधिकाशीतिरतः, पञ्चक-शून्येन विनिहतान्यनघानि॥६॥

अष्टा पञ्चाशदतश्-चतुःशतानीह मानुषे च क्षेत्रे।
लोकालोक-विभाग-प्रलोकनाऽऽलोक-संयुजां जय-भाजाम्॥७॥

नव-नव-चतुःशतानि च, सप्त च नवतिः सहस्र-गुणिताः षट् च।
पञ्चाशत्पञ्च-वियत्, प्रहताः पुनरत्र कोट्योऽष्टौ प्रोक्ताः॥८॥

एतावन्त्येव सता-मकृत्रि-माण्यथ जिनेशिनां भवनानि।
भुवन-त्रितये-त्रिभुवन-सुर-समिति-समर्च्यमान-सप्रतिमानि॥९॥

वक्षार-रुचक-कुण्डल-रौप्य-नगोत्तर-कुलेषु कारनगेषु।
कुरुषु च जिनभवनानि,त्रिशतान्यधिकानि तानि षड्विंशत्या॥१०॥

नन्दीश्वर-सद्द्वीपे, नन्दीश्वर-जलधि-परिवृते धृत-शोभे।
चन्द्र-कर-निकर-सन्निभ-रुन्द्र-यशो-वितत-दिङ्-मही-मण्डलके॥११॥

तत्रत्याञ्जन-दधिमुख-रतिकर-पुरु-नग-वराख्य-पर्वत-मुख्याः।
प्रतिदिश-मेषा-मुपरि, त्रयो-दशेन्द्रार्चितानि जिनभवनानि॥१२॥

आषाढ़-कार्तिकाख्ये, फाल्गुनमासे च शुक्ल पक्षेऽष्टम्याः।
आरभ्याष्ट-दिनेषु च, सौधर्म-प्रमुख-विबुधपतयो भक्त्या॥१३॥

तेषु महामह-मुचितं, प्रचुराक्षत-गन्ध-पुष्प-धूपै-र्दिव्यैः।
सर्वज्ञ-प्रतिमाना- मप्रतिमानां प्रकुर्वते सर्व-हितम्॥१४॥

भेदेन वर्णना का, सौधर्मः स्नपन-कर्तृता-मापन्नः।
परिचारक-भावमिताः, शेषेन्द्रा-रुन्द्र-चन्द्र-निर्मल-यशसः॥१५॥

मंगल-पात्राणि पुनस्तद्-, देव्यो बिभ्रतिस्म शुभ्र-गुणाढ्याः।
अप्सरसो नर्तक्यः शेष-सुरास्तत्र लोकनाव्यग्रधियः॥१६॥

वाचस्पति-वाचामपि, गोचरतां संव्यतीत्य यत्-क्रममाणम्।
विबुधपति-विहित-विभवं, मानुष-मात्रस्य कस्य शक्तिः स्तोतुम्॥१७॥

निष्ठापित-जिनपूजाश्- चूर्ण-स्नपनेन दृष्ट विकृत विशेषाः।
सुरपतयो नन्दीश्वर- जिनभवनानि प्रदक्षिणी कृत्य पुनः॥१८॥

पञ्चसु मंदरगिरिषु, श्रीभद्रशाल नन्दन-सौमनसम्।
पाण्डुकवनमिति तेषु, प्रत्येकं जिनगृहाणि चत्वार्येव॥१९॥

तान्यथ परीत्य तानि च, नमसित्वा कृत सुपूजनास्तत्रापि।
स्वास्पदमीयुः सर्वे, स्वास्पद मूल्यं स्वचेष्टया संगृह्य॥२०॥

सहतोरण सद्वेदी- परीतवनयाग-वृक्ष-मानस्तम्भः।
ध्वजपंक्ति दशक गोपुर, चतुष्टय त्रितय-शाल-मण्डप-वर्यैः॥२१॥

अभिषेक प्रेक्षणिका, क्रीडन संगीत नाटकालोकगृहैः।
शिल्पि विकल्पित-कल्पन- संकल्पातीत-कल्पनैः समुपेतैः॥२२॥

वापी सत्पुष्करिणी, सुदीर्घिकाद्यम्बु संसृतैः समुपेतैः।
विकसित जलरुह कुसुमैर्- नभस्यमानैः शशिग्रहर्क्षैः शरदि॥२३॥

भृंगाराब्दक-कलशा-, द्युपकरणैरष्टशतक-परिसंख्यानैः।
प्रत्येकं चित्रगुणैः, कृतझण झणनिनद-वितत-घंटाजालैः ॥२४॥

प्रविभाजंते नित्यं, हिरण्यमयानीश्चरेशिनां भवनानि।
गंधकुटी गत मृगपति, विष्टर-रुचिराणि-विविध-विभव-युतानि ॥२५॥

नंदीश्वर के चैत्यालयों में स्थिति प्रतिमाओं का वर्णन

येषु-जिनानां प्रतिमाः, पञ्चशत-शरासनोच्छ्रिताः सत्प्रतिमाः।
मणिकनक-रजत विकृता, दिनकर कोटि-प्रभाधिक-प्रभदेहाः ॥२६॥

तानि सदा वंदेऽहं, भानु प्रतिमानि यानि कानि च तानि।
यशसां महसां प्रतिदिश- मतिशय-शोभा-विभाञ्जि पापविभाञ्जि ॥२७॥

सप्तत्यधिक-शतप्रिय, धर्मक्षेत्रगत-तीर्थकर-वर-वृषभान्।
भूत-भविष्यत् संप्रति- काल-भवान् भवविहानये विनतोऽस्मि ॥२८॥

अस्या-मवसर्पिण्यां, वृषभजिनः प्रथम तीर्थकर्ता भर्ता।
अष्टापद गिरि मस्तक, गतस्थितो मुक्तिमाप पापान्मुक्तः ॥२९॥

श्री वासुपूज्य भगवान, शिवासु पूजासु पूजितस्त्रिदशानाम्।
चम्पायां दुरित-हरः, परमपदं प्रापदापदा-मन्तगतः ॥३०॥

मुदित मति बल मुरारि-प्रपूजितो जित कषाय रिपुरथ जातः।
बृहदूर्जयन्त-शिखरे, शिखामणिस्त्रिभुवनस्य-नेमिर्भगवान ॥३१॥

पावापुर वर सरसां, मध्यगतः सिद्धि वृद्धि तपसां महसाम्।
वीरो नीरदनादो, भूरि-गुणश्चारु शोभमास्पद-मगमत्॥३२॥

सम्मद करिवन-परिवृत- सम्मेद गिरीन्द्रमस्तके विस्तीर्णे।
शेषा ये तीर्थंकराः, कीर्तिभृतः प्रार्थितार्थ सिद्धिमवापन्॥३३॥

शेषाणां केवलिना-, मशेष मतवेदिगणभृतां साधूनां।
गिरितल विवर दरीसरि-, दुरुवनतरु-विटपि जलधि-दहन शिखासु॥३४॥

मोक्ष गतिहेतु-भूत- स्थानानि सुरेन्द्र रुन्द्र-भक्तिनुतानि।
मंगल भूतान्येता- न्यंगीकृत-धर्मकर्मणा-मस्माकम्॥३५॥

जिनपतयस्तत्-प्रतिमास्, तदालयास् तन्निषद्यका-स्थानानि।
ते ताश्च ते च तानि च, भवन्तु भव-घात-हेतवो भव्यानाम्॥३६॥

तीनों समय नन्दीश्वर भक्ति करने का फल

सन्ध्यासु तिसृषु नित्यं, पठेद्यदि स्तोत्र-मेतदुत्तम-यशसाम्।
सर्वज्ञानां सार्वं, लघु लभते श्रुतधरेडितं पद-ममितम्॥३७॥

आर्या छन्दः - अरिहंतों के शरीर सम्बन्धी दश अतिशय

नित्यं निःस्वेदत्वं, निर्मलता क्षीर-गौर-रुधिरत्वं च।
स्वाद्याकृति-संहनने, सौरूप्यं सौरभं च सौलक्ष्यम्॥३८॥

अप्रमित-वीर्यता च, प्रिय-हित वादित्व-मन्यदमित-गुणस्य।
प्रथिता दश-विख्याता, स्वतिशय-धर्मा स्वयं-भुवो देहस्य॥३९॥

केवलज्ञान के दश अतिशय

गव्यूति-शत-चतुष्टय-सुभिक्षता-गगन-गमन-मप्राणिवधः।
भुक्त्युपसर्गाभावश्, चतुरास्यत्वं च सर्व-विद्येश्वरता॥४०॥

अच्छायत्व-मपक्ष्य-स्पन्दश्च सम-प्रसिद्ध-नख-केशत्वम्।
स्वतिशय-गुणा भगवतो, घाति-क्षयजा भवन्ति तेऽपि दशैव॥४१॥

देवकृत चौदह अतिशय

सार्वार्ध-मागधीया, भाषा मैत्री च सर्व-जनता-विषया।
सर्वर्तु-फल-स्तबक-प्रवाल-कुसुमोपशोभित-तरु-परिणामाः॥४२॥

आदर्शतल-प्रतिमा, रत्नमयी जायते मही च मनोज्ञा।
विहरण-मन्वेत्यनिलः परमानन्दश्च भवति सर्व-जनस्य॥४३॥

मरुतोऽपि सुरभि-गन्ध-, व्यामिश्रा योजनान्तरं भूभागम्।
व्युपशमित-धूलि-कण्टक- तृण-कीटक-शर्करोपलं प्रकुर्वन्ति॥४४॥

तदनु स्तनित कुमारा, विद्युन्माला-विलास-हास-विभूषाः।
प्रकिरन्ति सुरभि-गन्धिं, गन्धोदक-वृष्टि-माज्ञया त्रिदशपतेः॥४५॥

वर-पद्मराग-केसर-मतुल-सुख-स्पर्श-हेम-मय-दल-निचयम्।
पादन्यासे पद्मं सप्त, पुरः पृष्ठतश्च सप्त भवन्ति॥४६॥

फलभार-नम्र-शालि- ब्रीह्यादि-समस्त-सस्य-धृत-रोमाञ्चा।
परिहृषितेव च भूमि- स्त्रिभुवन नाथस्य वैभवं पश्यन्ती॥४७॥

शरदुदय-विमल-सलिलं, सर इव गगनं विराजते विगतमलम्।
जहति च दिशस्तिमिरिकां, विगतरजः प्रभृति जिह्मता भावं सद्यः॥४८॥

एतेतेति त्वरितं ज्योति-र्व्यन्तर-दिवौकसा-ममृतभुजः।
कुलिश भृदाज्ञापनया, कुर्वन्त्यन्ये समन्ततो व्याह्वानम्॥४९॥

स्फुर-दर-सहस्र-रुचिरं, विमल-महारत्न-किरण-निकर-परीतम्।
प्रहसित-किरण-सहस्र- द्युति-मण्डल-मग्रगामि-धर्म-सुचक्रम्॥५०॥

इत्यष्ट-मंगलं च स्वादर्श-प्रभृति-भक्ति-राग-परीतैः।
उपकल्प्यन्ते त्रिदशै-रेतेऽपि-निरुपमातिशयाः॥५१॥

आठ प्रातिहार्यों का वर्णन

वैडूर्य-रुचिर-विटप-प्रवाल-मृदु-पल्लवोपशोभित-शाखः।
श्रीमानशोक-वृक्षो वर-मरकत-पत्र-गहन-बहलच्छायः॥५२॥

मन्दार-कुन्द-कुवलय-नीलोत्पल-कमल-मालती-बकुलाद्यैः।
समद-भ्रमर-परीतै-र्व्यामिश्रा पतति कुसुम-वृष्टि-र्नभसः॥५३॥

कटक-कटि-सूत्र-कुण्डल-केयूर-प्रभृति-भूषितांगौ स्वंगौ।
यक्षौ कमल-दलाक्षौ परि-निक्षिपतः सलील-चामर-युगलम्॥५४॥

आकस्मिक-मिव युगपद्-दिवसकर-सहस्त्र-मपगत-व्यवधानम्।
भामण्डल-मविभावित-रात्रिञ्दिव-भेद-मतितरामाभाति॥५५॥

प्रबल-पवनाभिघात-प्रक्षुभित-समुद्र-घोष-मन्द्र-ध्वानम्।
दन्ध्वन्यते सुवीणा-वंशादि-सुवाद्य-दुन्दुभिस्तालसमम्॥५६॥

त्रिभुवन-पतिता-लाञ्छन-मिन्दुत्रय-तुल्य-मतुल-मुक्ता-जालम्।
छत्रत्रयं च सुबृहद्-वैडूर्य-विक्लृप्त-दण्ड-मधिक-मनोज्ञम्॥५७॥

ध्वनिरपि योजनमेकं, प्रजायते श्रोतृ-हृदयहारि-गम्भीरः।
ससलिल-जलधर-पटल-ध्वनितमिव प्रवितताान्त-राशावलयम्॥५८॥

सिंहासन

स्फुरितांशु-रत्न-दीधिति-परिविच्छुरिताऽमरेन्द्र-चापच्छायम्।
ध्रियते मृगेन्द्रवर्यैः-स्फटिक-शिला-घटित-सिंह-विष्टर-मतुलम्॥५९॥

यस्येह चतुस्त्रिंशत्-प्रवर-गुणा प्रातिहार्य-लक्ष्यम्यश्चाष्टौ।
तस्मै नमो भगवते, त्रिभुवन-परमेश्वरार्हते गुण-महते॥६०॥

# श्री अर्हन्तदेव की महिमा

क्षेपक-श्लोकाः

गत्वा क्षितेर्वियति पंच सहस्र दण्डान्।
सोपान-विंशति सहस्र-विराजमाना॥
रेजे सभा धनद यक्षकृता यदीया।
तस्मै नमस्त्रिभुवनप्रभवे जिनाय॥१॥

सालोऽथ वेदिरथ वेदिरथोऽपि सालो,
वेदिश्च साल इह वेदिरथोऽपि सालः।
वेदिश्च भाति सदसि क्रमतो यदीये,
तस्मै नमस्त्रिभुवनप्रभवे जिनाय॥२॥

प्रासाद-चैत्य-निलयाः परिखात-वल्ली।
प्रोद्यान केतु सुरवृक्ष गृहाङ्गणाश्च॥
पीठत्रयं सदसि यस्य सदा विभाति,
तस्मै नमस्त्रिभुवन-प्रभवे जिनाय॥३॥

माला-मृगेन्द्र-कमलाम्बर वैनतेय-,
मातंग गोपतिरथाङ्ग मयूरहंसाः।
यस्य ध्वजा विजयिनो भुवने विभान्ति,
तस्मै नमस्त्रिभुवन-प्रभवे जिनाय॥४॥

निर्ग्रंन्थ-कल्प-वनिता-व्रतिका भ-भौम,
नागस्त्रियो भवन-भौम-भ-कल्पदेवाः।
कोष्ठस्थिता नृ-पशवोऽपि नमन्ति यस्य
तस्मै नमस्त्रिभुवन-प्रभवे जिनाय॥५॥

भाषा-प्रभा-वलय-विष्टर-पुष्पवृष्टिः,
पिण्डिद्रुमस्त्रिदशदुन्दुभि-चामराणि।
छत्रत्रयेण सहितानि लसन्ति यस्य,
तस्मै नमस्त्रिभुवन-प्रभवे जिनाय॥६॥

भृंगार-ताल-कलश-ध्वजसुप्रतीक-
श्वेतातपत्र-वरदर्पण-चामराणि।
प्रत्येक-मष्टशतकानि विभान्ति यस्य
तस्मै नमस्त्रिभुवन-प्रभवे जिनाय॥७॥

स्तंभ-प्रतोलि-निधि-मार्ग-तडाग-वापी-
क्रीडाद्रि-धूप-घट-तोरण-नाट्य-शालाः।
स्तूपाश्च चैत्य-तरवो विलसन्ति यस्य
तस्मै नमस्त्रिभुवन-प्रभवे जिनाय॥८॥

सेनापति स्थपति-हर्म्यपति-द्विपाश्व,
स्त्री-चक्र-चर्म-मणि-काकिणिका-पुरोघाः।
छत्रासि-दंडपतयः प्रणमन्ति यस्य
तस्मै नमस्त्रिभुवन-प्रभवे जिनाय॥९॥

पद्मःकालो महाकालः सर्वरत्नश्च पांडुकः,
नैसर्पो माणवः शंखः पिंगलो निधयो नव।
एतेषां पतयः प्रणमन्ति यस्य,
तस्मै नमस्त्रिभुवन-प्रभवे जिनाय॥१०॥

खविय-घण-घाइ-कम्मा, चउतीसातिसय विसेस पंच कल्लाणा।
अट्टवर पाडिहेरा, अरिहंता मंगला मज्झं॥११॥

अञ्चलिका

इच्छामि भन्ते ! णंदीसर भत्ति काउस्सग्गो कओ तस्सालोचेउं। णंदीसर दीवम्मि, चउदिस विदिसासु अंजण-

दधिमुह-रदिकर-पुरुणगवरेसु जाणि जिणचेइयाणि ताणि सव्वाणि तिसुवि लोएसु भवणवासिय वाणविंतर-जोइसिय-कप्पवासिय-त्ति चउविहा देवा सपरिवारा दिव्वेहिं ण्हाणेहिं, दिव्वेहिं गंधेहिं, दिव्वेहिं अक्खेहिं, दिव्वेहिं पुप्फेहिं, दिव्वेहिं चुण्णेहिं, दिव्वेहिं दीवेहिं, दिव्वेहिं धूवेहिं, दिव्वेहिं वासेहिं, आसाढ़-कात्तिय फागुण-मासाणं अट्ठमिमाइं काऊणजाव पुण्णिमंति णिच्चकालं अच्चंति, पुज्जंति, वंदंति, णमंसंति। णंदीसर महाकल्लाण पुज्जं करंति अहमवि इह संतो तत्थ संताइयं णिच्चकालं अच्चेमि पूजेमि, वंदामि, णमस्सामि, दुक्खक्खओ, कम्मक्खओ, बोहिलाहो सुगइ-गमणं, समाहिमरणं जिणगुण संपत्ति होउ मज्झं।

॥ इति नंदीश्वर भक्तिः ॥

इस स्थति में अवश्य बोलें

**धर्म नाशे क्रिया ध्वंसे स्वसिद्धान्तार्थ विप्लवे।**
**अपृष्टैरपि वक्तव्यं तत्स्वरूप प्रकाशने॥**

# श्री निर्वाण भक्ति

आर्या छन्द

विबुधपति-खगपतिनरपति-धनदोरग-भूतयक्षपति-महितम्।
अतुल-सुखविमल निरुपम-शिवमचलमनामयं हि संप्राप्तम्॥१॥

कल्याणैः - संस्तोष्ये पञ्चभिरनघं त्रिलोक परमगुरुम्।
भव्यजनतुष्टि जननैर्दुरवापैः सन्मतिं भक्त्या॥२॥

आषाढसुसित-षष्ठ्यां हस्तोत्तर मध्यमाश्रितेशशिनि।
आयातः स्वर्गसुखं भुक्त्वापुष्पोत्तराधीशः॥३॥

सिद्धार्थनृपतितनयो भारतवास्ये विदेहकुण्डपुरे।
देव्यां प्रियकारिण्यां सुस्वप्नान् संप्रदर्श्य विभुः॥४॥

चैत्र सित पक्ष-फाल्गुनि शशांकयोगे दिने त्रयोदश्याम्।
जज्ञे स्वोच्चस्थेषु ग्रहेषु सौम्येषु शुभलग्ने॥५॥

हस्ताश्रिते शशांके चैत्र ज्योत्स्ने चतुर्दशीदिवसे।
पूर्वाह्णे रत्नघटै-र्विबुधेन्द्राश्-चक्रुरभिषेकम्॥६॥

भुक्त्वा कुमार काले त्रिंशद्वर्षाण्यनंत गुणराशिः।
अमरोपनीत भोगान्सहसाभिनिबोधितोऽन्येद्युः॥७॥

नानाविधरुपचितां विचित्र कूटोच्छ्रितां मणिविभूषाम्।
चन्द्रप्रभाख्यशिविकामारुह्य पुराद्विनिः क्रान्तः॥८॥

मार्गशिरकृष्णदशमी हस्तोत्तर मध्यमाश्रिते सोमे।
षष्ठेन त्वपराह्णे भक्तेन जिनः प्रवव्राजः॥९॥

ग्रामपुर खेट कर्वटमटंब घोषाकरान्प्रविजहार।
उग्रैस्तपोविधानैर्द्वादशवर्षाण्यमर पूज्यः॥१०॥

ऋजुकूलायास्तीरे शाल्मद्रुम संश्रिते शिलापट्टे।
अपराह्णे षष्ठेनास्थितस्य खलु जृंभिका ग्रामे॥११॥

वैशाखसितदशम्यां हस्तोत्तरमध्यमाश्रिते चन्द्रे।
क्षपक श्रेण्या-रूढस्योत्पन्नं केवलज्ञानम्॥१२॥

अथ भगवान संप्रापद्-दिव्यं वैभारपर्वतं रम्यम्।
चातुर्वर्ण्य सुसंघस्तत्राभूद् गौतम प्रभृति॥१३॥

छत्राशोकौ घोषं सिंहासन दुंदुभि कुसुमवृष्टिम्।
वरचामर भामण्डल दिव्यान्यन्यानि चावापत्॥१४॥

दसविधमनगाराणामेकादशधोत्तर तथा धर्मम्।
देशयमानो व्यवहरंस्त्रिंशद्वर्षाण्यथ जिनेन्द्रः॥१५॥

पद्मवनदीर्घिकाकुल विविध द्रुमखण्डमण्डिते रम्ये।
पावानगरोद्याने व्युत्सर्गेण स्थितः स मुनिः॥१६॥

कार्तिककृष्ण स्यान्ते स्वातावृक्षे निहत्यकर्मरजः।
अवशेषं संप्रापद्व्यजरामरमक्षयं सौख्यम्॥१७॥

परिनिर्वृत्तं जिनेन्द्रं ज्ञात्त्वा विबुधाह्यथासु चागम्य।
देवतरुरक्त चन्दन कालागरु सुरभिगो-शीर्षैः॥१८॥

अग्नीन्द्राज्जिनदेहं मुकुटानलसुरभि धूपवरमाल्यैः।
अभ्यर्च्य गणधरानपि गतादिवं खं च वनभवने॥१९॥

(प्रहर्षिणी छंदः)

इत्येवं भगवति वर्धमान चन्द्रे,
यः स्तोत्रं पठति सुसंध्ययोर्द्वयोर्हि।
सोऽनन्तं परम सुखं नृदेवलोके,
भुक्त्वान्ते शिवपदमक्षयं प्रयाति॥२०॥

बसंततिलका छंदः

यत्रार्हतां गणभृतां श्रुतपारगाणां,
निर्वाणभूमिरिह भारतवर्षजानाम्।
तामद्य शुद्धमनसा क्रियया वचोभिः,
संस्तोतुमुद्यतमतिः परिणौमि भक्त्या॥२१॥

कैलाश शैलशिखरे परिनिर्वृत्तोऽसौ,
शैलेशिभावमुपपद्य वृषो महात्मा।
चम्पापुरे च वसुपूज्यसुतः सुधीमान्,
सिद्धिं परामुपगतो गतरागबन्धः॥२२॥

यत्प्रार्थ्यते शिवमयं विबुधेश्वराद्यैः,
पाखण्डिभिश्च परमार्थगवेष शीलैः।
नष्टाष्ट कर्म समये तदरिष्टनेमिः,
संप्राप्तवान् क्षितिधरे वृहदूर्जयन्ते॥२३॥

पावापुरस्य बहिरुन्नत भूमिदेशे,
पद्मोत्पलाकुलवतां सरसां हि मध्ये।
श्री वर्द्धमान जिनदेव इति प्रतीतो,
निर्वाणमाप भगवान्प्रविधूतपाप्मा॥२४॥

शेषास्तु ते जिनवरा जितमोहमल्ला,
ज्ञानार्क भूरि किरणैरवभास्य लोकान्।
स्थानं परं निरवधारित सौख्य निष्ठं,
सम्मेद पर्वततले समवापुरीशाः॥२५॥

आद्यश्चतुर्दशदिनैर्विनिवृत्त योगः,
षष्ठेन निष्ठित कृतिर्जिन वर्द्धमानः।
शेषाविधूत घनकर्म निबद्धपाशाः,
मासेन ते यति वरांस्त्व भवन्वियोगाः॥२६॥

माल्यानि वाक्स्तुतिमयैः कुसुमैः सुदृब्धा-,
न्यादाय मानसकरैरभितः किरन्तः।
पर्येम आदृतियुता भगवन्निषद्याः,
संप्रार्थिता वयमिमे परमां गतिं ताः॥२७॥

शत्रुञ्जयेनगवरे दमितारिपक्षाः,
पण्डोः सुताः परमनिर्वृतिमभ्युपेताः।
तुंग्यां तु संगरहितो बलभद्रनामा,
नद्यास्तटे जिनरिपुश्च सुवर्णभद्रः॥२८॥

द्रोणीमति प्रबलकुण्डल मेढ्रके च,
वैभार पर्वततले वरसिद्धकूटे।
ऋष्यद्रिके च विपुलाद्रि बलाहके च,
विन्ध्ये च पोदनपुरे वृषदीपके च॥२९॥

सह्याचले च हिमवत्यपि सुप्रतिष्ठे,
दण्डात्मके गजपथे पृथुसारयष्टौ।
ये साधवो हतमलाः सुगतिं प्रयाताः,
स्थानानि तानि जगति प्रथितान्य भूवन्॥३०॥

इक्षोर्विकार रसपृक्त गुणेन लोके,
पिष्टोऽधिकं मधुरतामुपयाति यद्वत्।

तद्वच्च पुण्यपुरुषै रुषितानि नित्यं,

स्थानानि तानि जगतामिह पावनानि ॥३१ ॥

इत्यर्हतां शमवतां च महामुनीनां,

प्रोक्ता मयात्र परिनिर्वृति भूमि देशाः।

तेमे जिना जितभया मुनयश्च शांताः,

दिश्यासुराशु सुगतिं निरवद्य सौख्याम् ॥३२ ॥

क्षेपक श्लोकानि:

कैलाशाद्रौ मुनीन्द्रः पुरुरपदुरितो मुक्तिमाप प्रणूतः।
चंपायां वासुपूज्यस्त्रिदशपतिनुतो नेमिरप्यूर्जयंते ॥१ ॥

पावायां वर्धमानस्त्रिभुवनगुरवो विंशतिस्तीर्थनाथाः।
सम्मेदाग्रे प्रजग्मुर्ददतु विनमतां निवृत्तिं नो जिनेन्द्राः ॥२ ॥

गोर्गजोश्वः कपिः कोकः सरोजः स्वस्तिकः शशी।
मकरः श्रीयुतो वृक्षो गंडो महिष सूकरौ ॥३ ॥

सेधा वज्रमृगच्छागाः पाठीनः कलशस्तथा।
कच्छपश्चोत्पलं शंखो नागराजश्च केसरी ॥४ ॥

शान्ति कुन्थवर कौरव्या यादवौ नेमिसुव्रतौ।
उग्रनाथौ पार्श्ववीरौ शेषा इक्ष्वाकुवंशजाः ॥५ ॥

## अञ्चलिका

इच्छामि भंते ! परिणिव्वाण भत्ति काउस्सग्गो कओ तस्सालोचेउं, इमम्मि, अवसप्पिणीए चउत्थ समयस्स पच्छिमे भाए, आउट्ठमासहीणे वास चउक्कम्मि सेसकालम्मि, पावाए णयरीए कत्तिय मासस्य किण्ह चउदसिए रत्तीए, सादीए, णक्खत्ते, पच्चूसे, भयवदो महदि महावीरो वड्ढमाणो सिद्धिं गदो। तिसुवि लोएसु, भवणवासिय-वाणविंतर जोयिसिय कप्पवासियत्ति चउव्विहा देवा सपरिवारा दिव्वेण ण्हाणेण, दिव्वेण गंधेण दिव्वेण अक्खेण, दिव्वेण पुप्फेण, दिव्वेण चुण्णेण, दिव्वेण दीवेण, दिव्वेण धूवेण, दिव्वेण वासेण, णिच्चकालं, अच्चंति पुज्जंति, वंदति, णमंसंति, परिणिव्वाण, महाकल्लाण पुज्जं करंति। अहमवि इह संतो तत्थ संताइयं णिच्चकालं, अच्चेमि, पुज्जेमि, वंदामि, णमस्सामि, दुक्खक्खओ, कम्मक्खओ बोहिलाहो, सुगइगमणं, समाहिमरणं जिणगुणसम्पत्ति होउ मज्झं।

॥ इति निर्वाण भक्तिः॥

**नमन का फल**

नमन्ति फलिनो वृक्षा नमन्ति गुणिनो जनः।
शुष्क वृक्षश्च मूर्खश्च न नमन्ति कदाचन॥

# तत्त्वार्थ सूत्रम्

(आचार्य श्री उमास्वामी विरचितम्)

मोक्ष-मार्गस्य नेतारं, भेत्तारं कर्म भू-भृताम्।
ज्ञातारं विश्व तत्त्वानां, वन्दे तद्गुण-लब्धये॥
त्रैकाल्यं द्रव्यषट्कं, नवपद सहितं जीव षट्काय लेश्याः,
पञ्चान्ये चास्तिकाया, व्रत समिति-गति ज्ञान चारित्र भेदाः।
इत्येतन्मोक्षमूलं, त्रिभुवन-महितैः प्रोक्तमर्हद्भिरीशैः,
प्रत्येतिश्रद्दधाति, स्पृशति च मतिमान यः स वै शुद्धदृष्टिः॥१॥

सिद्धे जयप्पसिद्धे, चउव्विहाराहणाफलं पत्ते।
वंदित्ता अरहंते, वोच्छं आराहणा कमसो॥२॥
उज्जोवणमुज्जवणं, णिव्वहणं साहणं च णिच्छरणं।
दंसणणाणचरित्तं, तवाणमाराहणा भणिया॥३॥

## 卐 प्रथम अध्याय 卐

सम्यग्दर्शन ज्ञान चारित्राणि मोक्षमार्गः॥१॥ तत्त्वार्थ-श्रद्धानं सम्यग्दर्शनम्॥२॥ तन्निसर्गादधिगमाद्वा॥३॥ जीवाजीवास्रव-बन्ध संवर निर्जरा मोक्षास्तत्त्वम्॥४॥ नाम

स्थापना द्रव्य भावतस् तन्न्यासः॥५॥ प्रमाणनयै-रधिगमः ॥६॥ निर्देश स्वामित्व साधनाधि करणस्थिति विधानतः॥७॥ सत्संख्या-क्षेत्रस्पर्शन-कालान्तर भावाल्पबहुत्वैश्च॥८॥ मतिश्रुतावधि मनःपर्यय केवलानि ज्ञानम्॥९॥ तत्प्रमाणे ॥१०॥ आद्ये परोक्षम्॥११॥ प्रत्यक्षमन्यत्॥१२॥ मतिः स्मृतिः संज्ञा चिन्ताभिनिबोध इत्यनर्थान्तरम्॥१३॥ तदिन्द्रियानिन्द्रिय निमित्तम्॥१४॥ अवग्रहेहावायधारणाः ॥१५॥ बहुबहुविधक्षि-प्रानिःसृतानुक्त -ध्रुवाणां सेतराणाम्॥१६॥ अर्थस्य॥१७॥ व्यञ्जनस्या- वग्रहः॥१८॥ न चक्षु-रनिन्द्रियाभ्याम्॥१९॥ श्रुतं मतिपूर्वं द्वयनेक द्वादश भेदम्॥२०॥ भव प्रत्ययोऽ-वधिर्देव नारकाणाम्॥२१॥ क्षयोपशमनिमित्तः षड् विकल्पः शेषाणाम्॥२२॥ ऋजुविपुलमती मनःपर्ययः॥२३॥ विशुद्ध्यप्रतिपाताभ्यां तद्विशेषः॥२४॥ विशुद्धिक्षेत्र-स्वामि-विषयेभ्योऽवधि मनः-पर्यययोः॥२५॥ मति-श्रुतयोर्निबन्धो द्रव्येष्वसर्वपर्यायेषु ॥२६॥ रूपिष्ववधेः॥२७॥ तदनन्तभागे मनः- पर्ययस्य॥२८॥ सर्वद्रव्यपर्यायेषु केवलस्य॥२९॥ एकादीनि भाज्यानि युगपदेकस्मिन्ना चतुर्भ्यः॥३०॥ मतिश्रुतावधयो विपर्ययश्च॥३१॥ सदसतो-रविशेषा-

द्यदृच्छोपलब्धे-रुन्मत्तवत् ॥३२॥ नैगम-संग्रह- व्यवहारर्जुसूत्र-शब्द-समभिरूढैवंभूता नयाः ॥३३॥

॥ इति तत्त्वार्थाधिगमे मोक्षशास्त्रे प्रथमोऽध्यायः नमो नमः ॥

## 卐 द्वितीय अध्याय 卐

औपशमिक क्षायिकौ भावौ मिश्रश्च जीवस्य स्वतत्त्वमौदयिक पारिणामिकौ च ॥१॥ द्विनवाष्टादशैक विंशति त्रिभेदा यथाक्रमम् ॥२॥ सम्यक्त्वचारित्रे ॥३॥ ज्ञानदर्शन-दानलाभभोगोपभोगवीर्याणि च ॥४॥ ज्ञानाऽज्ञान-दर्शनलब्धय-श्चतुस्त्रित्रि पञ्च भेदाः सम्यक्त्व चारित्र संयमासंयमाश्च ॥५॥ गति कषाय लिङ्ग मिथ्यादर्शनाज्ञानासंयतासिद्ध लेश्याश्चतुश्चतुस्त्र्ये- कैकैकैकषड् भेदाः ॥६॥ जीव-भव्याभव्यत्वानि च ॥७॥ उपयोगो लक्षणम् ॥८॥ स द्विविधोऽष्ट-चतुर्भेदः ॥९॥ संसारिणो मुक्ताश्च ॥१०॥ समनस्कामनस्काः ॥११॥ संसारिणस्त्रस स्थावराः ॥१२॥ पृथिव्यप्तेजो-वायु वनस्पतयः स्थावराः ॥१३॥ द्वीन्द्रियादयस्त्रसाः ॥१४॥ पञ्चेन्द्रि- याणि ॥१५॥

द्विविधानि ॥१६ ॥ निर्वृत्त्युपकरणे द्रव्येन्द्रियम् ॥१७ ॥ लब्ध्युपयोगौ भावेन्द्रियम् ॥१८ ॥ स्पर्शन-रसन-घ्राण-चक्षुः श्रोत्राणि ॥१९ ॥ स्पर्श-रस-गन्ध-वर्ण शब्दास् तदर्थाः ॥२० ॥ श्रुतमनिन्द्रियस्य ॥२१ ॥ वनस्पत्यन्ताना- मेकम् ॥२२ ॥ कृमि पिपीलिका-भ्रमर- मनुष्यादीनामेकैक वृद्धानि ॥२३ ॥ सञ्ज्ञिनः समनस्काः ॥२४ ॥ विग्रहगतौ कर्मयोगः ॥२५ ॥ अनुश्रेणि गतिः ॥२६ ॥ अविग्रहा जीवस्य ॥२७ ॥ विग्रहवती च संसारिणः प्राक् चतुर्भ्यः ॥२८ ॥ एकसमयाविग्रहा ॥२९ ॥ एकं द्वौ त्रीन्-वानाहारकः ॥३० ॥ सम्मूर्च्छन-गर्भोपपादा जन्म ॥३१ ॥ सचित्तशीत-संवृताः सेतरा मिश्राश्चैकशस्तद्योनयः ॥३२ ॥ जरायु-जाण्डजपोतानां गर्भः ॥३३ ॥ देवनारका-णामुपपादः ॥३४ ॥ शेषाणां सम्मूर्च्छनम् ॥३५ ॥ औदारिक-वैक्रियि-काहारक- तैजस-कार्मणानि शरीराणि ॥३६ ॥ परं परं सूक्ष्मम् ॥३७ ॥ प्रदेशतोऽसंख्येयगुणं प्राक् तैजसात् ॥३८ ॥ अनन्त-गुणे परे ॥३९ ॥ अप्रतीघाते ॥४० ॥ अनादि संबंधे च ॥४१ ॥ सर्वस्य ॥४२ ॥ तदादीनि भाज्यानि युगपदेकस्मिन्ना चतुर्भ्यः ॥४३ ॥ निरुपभोगमन्त्यम् ॥४४ ॥ गर्भ सम्मूर्च्छन ज-माद्यम् ॥४५ ॥ औपपादिकं वैक्रियिकम् ॥४६ ॥

लब्धिप्रत्ययं च ॥४७॥ तैजसमपि ॥४८॥ शुभं विशुद्धमव्याघाति चाहारकं प्रमत्त संयतस्यैव ॥४९॥ नारक-सम्मूर्च्छिनो नपुंसकानि ॥५०॥ न देवाः ॥५१॥ शेषास्-त्रिवेदाः ॥५२॥ औपपादिक-चरमोत्तमदेहासंख्येय वर्षायुषोऽनपवर्त्यायुषः ॥५३॥

॥ इति तत्त्वार्थाधिगमे मोक्षशास्त्रे द्वितीयोऽध्यायः नमो नमः ॥

## 卐 तृतीय अध्याय 卐

रत्न-शर्करा बालुका-पङ्क-धूम-तमो- महातमः-प्रभा भूमयो घनाम्बुवाताकाश प्रतिष्ठाः सप्ताधोऽधः ॥१॥ तासु त्रिंशत्पंचविंशति पंचदश दशत्रिपंचोनैक नरक शतसहस्राणि पञ्च चैव यथाक्रमम् ॥२॥ नारका नित्याशुभतर लेश्या परिणामदेह वेदना विक्रियाः ॥३॥ परस्परोदीरित दुःखः ॥४॥ संक्लिष्टासुरोदीरित-दुःखाश्च प्राक् चतुर्थ्याः ॥५॥ तेष्वेक त्रि-सप्त-दश सप्तदश-द्वाविंशति त्रयस्त्रिंशत् सागरोपमा सत्त्वानां परा स्थितिः ॥६॥ जम्बूद्वीप लवणोदादयः शुभनामानो द्वीपसमुद्राः ॥७॥ द्विर्द्विर्विष्कम्भाः पूर्व पूर्व परिक्षेपिणो वलयाकृतयः ॥८॥ तन्मध्ये मेरुनाभिर्वृत्तो योजन शतसहस्र विष्कम्भो जम्बूद्वीपः ॥९॥ भरत-हैमवत-हरि-विदेह-रम्यक

हैरण्यवतैरावतवर्षाः क्षेत्राणि ॥१०॥ तद्विभाजिनः पूर्वापरायता हिमवन्-महाहिमवन्-निषध-नील रुक्मि शिखरिणो वर्षधर पर्वताः ॥११॥ हेमार्जुनतपनीय- वैडूर्य-रजत हेममयाः ॥१२॥ मणिविचित्रपार्श्वा उपरिमूले च तुल्यविस्ताराः ॥१३॥ पद्म महापद्म-तिगिञ्छ- केशरि महापुण्डरीक-पुण्डरीका ह्रदास्तेषामुपरि ॥१४॥ प्रथमो योजन-सहस्रायामस् तदर्द्ध विष्कम्भो ह्रदः ॥१५॥ दशयोजनावगाहः ॥१६॥ तन्मध्ये योजनं पुष्करम् ॥१७॥ तद्द्विगुण-द्विगुणा ह्रदाः पुष्कराणि च ॥१८॥ तन्निवासिन्यो देव्यः श्री-ह्री-धृति- कीर्ति-बुद्धि-लक्ष्म्यः पल्योपमस्थित्यः ससामानिक - परिषत्काः ॥१९॥ गङ्गा-सिन्धु-रोहिद्रोहितास्या- हरिद्धरिकान्ता-सीतासीतोदा-नारीनरकान्ता- सुवर्णरूप्यकूला-रक्तारक्तोदाः-सरितस्तन्म-ध्यगाः ॥२०॥ द्वयोर्द्वयोः पूर्वाः पूर्वगाः ॥२१॥ शेषास्त्वपरगाः ॥२२॥ चतुर्दशनदी सहस्र परिवृता गङ्गासिन्ध्वादयो नद्यः ॥२३॥ भरतः षड्-विंशति पञ्चयोजन शतविस्तारः षट् चैकोनविंशतिभागा योजनस्य ॥२४॥ तद्द्विगुण द्विगुणविस्तारा वर्षधरवर्षा विदेहान्ताः ॥२५॥ उत्तरा-दक्षिण-तुल्याः ॥२६॥ भरतैरावतयो-र्वृद्धिह्रासौ षट्-समयाभ्या- मुत्सर्पिण्यव-

सर्पिणीभ्याम् ॥२७॥ ताभ्यामपरा भूमयोऽवस्थिताः ॥२८॥ एक-द्वि-त्रि-पल्योपमस्थितयो हैमवतक-हारिवर्षक दैव-कुरवकाः ॥२९॥ तथोत्तराः ॥३०॥ विदेहेषु संख्येयकालाः ॥३१॥ भरतस्य विष्कम्भो जम्बूद्वीपस्य नवतिशत-भागः ॥३२॥ द्विर्धातकीखण्डे ॥३३॥ पुष्करार्द्धे च ॥३४॥ प्राङ् मानुषो-त्तरान्मनुष्याः ॥३५॥ आर्या म्लेच्छाश्च ॥३६॥ भरतैरावतविदेहाः कर्मभूमयोऽन्यत्र देवकुरुत्तर कुरुभ्यः ॥३७॥ नृस्थिती पराऽवरे त्रिपल्योपमान्तर्मुहूर्ते ॥३८॥ तिर्यग्-योनिजानां च ॥३९॥

॥ इति तत्त्वार्थाधिगमे मोक्षशास्त्रे तृतीयोऽध्यायः नमो नमः ॥

## 卐 चतुर्थ अध्याय 卐

देवाश्चतुर्णिकायाः ॥१॥ आदितस् त्रिषु पीतान्त लेश्याः ॥२॥ दशाष्ट पञ्च द्वादश विकल्पाः कल्पोपपन्नपर्यन्ताः ॥३॥ इन्द्र-सामानिक त्रायस्त्रिंश पारिषदात्मरक्षलोकपालानीक- प्रकीर्णकाभियोग्य-किल्विषिकाश्चैकशः ॥४॥ त्रायस्त्रिंश लोकपाल वर्ज्या व्यन्तर ज्योतिष्काः ॥५॥ पूर्वयो-र्द्वीन्द्राः ॥६॥ कायप्रवीचारा आ

ऐशानात् ॥७॥ शेषाः- स्पर्श-रूप-शब्द-मनः प्रवीचाराः ॥८॥ परेऽप्रवीचाराः ॥९॥ भवनवासिनोऽसुरनाग- विद्युत्सुपर्णाग्नि-वातस्तनितोदधि-द्वीप- दिक्कुमाराः ॥१०॥ व्यन्तराः किन्नर-किंपुरुष-महोरग-गन्धर्व-यक्ष-राक्षस-भूत-पिशाचाः ॥११॥ ज्योतिष्काः सूर्याचन्द्रमसौ ग्रह-नक्षत्र-प्रकीर्णक- तारकाश्च ॥१२॥ मेरुप्रदक्षिणा नित्यगतयो नृलोके ॥१३॥ तत्कृतः कालविभागः ॥१४॥ बहिरवस्थिताः ॥१५॥ वैमानिकाः ॥१६॥ कल्पोपपन्नाः कल्पातीताश्च ॥१७॥ उपर्युपरि ॥१८॥सौधर्मैशान- सानत्कुमारमाहेन्द्र ब्रह्मब्रह्मोत्तर लान्तवकापिष्ठ शुक्रमहाशुक्र शतारसहस्रा-रेष्वानतप्राणतयो-रारणाच्युतयो-र्नवसु-ग्रैवेयकेषु विजय वैजयन्त जयन्तापराजितेषु-सर्वार्थसिद्धौ च ॥१९॥ स्थिति-प्रभाव-सुख-द्युति-लेश्या-विशुद्धीन्द्रियावधि विषयतोऽधिकाः ॥२०॥ गति शरीर परिग्रहाभिमानतो हीनाः ॥२१॥ पीत पद्म शुक्ल लेश्या द्वित्रिशेषेषु ॥२२॥ प्राग्ग्रैवेयकेभ्यः कल्पाः ॥२३॥ ब्रह्मलोकालया लौकान्तिकाः ॥२४॥ सारस्वतादित्य-बह्न्यरुण गर्दतोय-तुषिता-व्याबाधारिष्टाश्च ॥२५॥ विजयादिषु द्विचरमाः ॥२६॥ औपपादिक मनुष्येभ्यः शेषास्तिर्यग्योनयः ॥२७॥

स्थिति-रसुर नाग सुपर्ण-द्वीपशेषाणां सागरोपम त्रिपल्योपमार्द्धहीन-मिताः ॥२८॥ सौधर्मैशानयोः सागरोपमे-ऽधिके॥२९॥ सानत्कुमार- माहेन्द्रयोः सप्त॥३०॥ त्रिसप्त नवैकादश त्रयोदश पञ्चदशभि-रधिकानि तु॥३१॥ आरणाच्युतादूर्ध्वमेकैकेन नवसु ग्रैवेयकेषु विजयादिषु सर्वार्थसिद्धौ च॥३२॥ अपरा पल्योपममधिकम्॥३३॥ परतः परतः पूर्वा पूर्वाऽनन्तरा ॥३४॥ नारकाणां च द्वितीयादिषु॥३५॥ दशवर्ष सहस्त्राणि प्रथमायाम्॥३६॥ भवनेषु च॥३७॥ व्यन्तराणां च॥३८॥ परा पल्योपम- मधिकम्॥३९॥ ज्योतिष्काणां च॥४०॥ तदष्ट- भागोऽपरा॥४१॥ लौकान्तिकानामष्टौ सागरोपमाणि सर्वेषाम्॥४२॥

॥ इति तत्त्वार्थाधिगमे मोक्षशास्त्रे चतुर्थोऽध्यायः नमो नमः ॥

## 卐 पंचम अध्याय 卐

अजीवकाया धर्माधर्माकाश पुद्गलाः॥१॥ द्रव्याणि॥२॥ जीवाश्च॥३॥ नित्यावस्थितान्-यरूपाणि ॥४॥ रूपिणः पुद्गलाः॥५॥ आ आकाशादेकद्रव्याणि ॥६॥ निष्क्रियाणि च॥७॥ असंख्येयाः प्रदेशा धर्मा-धर्मैकजीवानाम्

॥८॥ आकाशस्यानन्ताः ॥९॥ संख्येयासंख्येयाश्च पुद्गलानाम् ॥१०॥ नाणोः ॥११॥ लोकाकाशेऽवगाहः ॥१२॥ धर्माऽधर्मयोः कृत्स्ने ॥१३॥ एकप्रदेशादिषु भाज्यः पुद्गलानाम् ॥१४॥ असंख्येय- भागादिषु जीवानाम् ॥१५॥ प्रदेशसंहार-विसर्पाभ्यां प्रदीपवत् ॥१६॥ गतिस्थित्युपग्रहौ धर्माऽधर्मयो- रुपकारः ॥१७॥ आकाशस्यावगाहः ॥१८॥ शरीरवाङ्मनः प्राणापानाः पुद्गलानाम् ॥१९॥ सुखदुख जीवित-मरणोपग्रहाश्च ॥२०॥ परस्परोपग्रहो जीवानाम् ॥२१॥ वर्तना-परिणामक्रियाः परत्वाऽपरत्वे च कालस्य ॥२२॥ स्पर्शरसगन्धवर्णवन्तः पुद्गलाः ॥२३॥ शब्द-बन्ध-सौक्ष्म्य- स्थौल्य संस्थान-भेद तमश् छायाऽऽतपोद्योतवन्तश्च ॥२४॥ अणवः स्कन्धाश्च ॥२५॥ भेद-सङ्घातेभ्य उत्पद्यन्ते ॥२६॥ भेदादणुः ॥२७॥ भेद-सङ्घाताभ्यां चाक्षुषः ॥२८॥ सद्द्रव्य लक्षणम् ॥२९॥ उत्पादव्यय ध्रौव्ययुक्तं सत् ॥३०॥ तद्भावाऽव्ययं नित्यम् ॥३१॥ अर्पिताऽनर्पितसिद्धेः ॥३२॥ स्निग्ध-रुक्षत्वाद्-बन्धः ॥३३॥ न जघन्य-गुणानाम् ॥३४॥ गुणसाम्ये सदृशानाम् ॥३५॥ द्व्यधिकादिगुणानां तु ॥३६॥ बन्धेऽधिकौ पारिणामिकौ च ॥३७॥ गुणपर्यय-वद्द्रव्यम् ॥३८॥ कालश्च ॥३९॥

सोऽनन्तसमयः ॥४०॥ द्रव्याश्रया निर्गुणा गुणाः॥४१॥ तद्भावः परिणामः॥४२॥

॥ इति तत्त्वार्थाधिगमे मोक्षशास्त्रे पंचमोऽध्यायः नमो नमः ॥

## 卐 षष्ठम् अध्याय 卐

कायवाङ्मनः-कर्मयोगः॥१॥ स आस्त्रवः॥२॥ शुभः पुण्यस्याशुभः पापस्य॥३॥ सकषायाऽकषाययोः साम्परायिकेर्यापथयोः॥४॥ इन्द्रिय-कषायाव्रत-क्रियाः पञ्च-चतुः-पञ्च- पञ्चविंशति-संख्याः पूर्वस्य भेदाः॥५॥ तीव्रमन्द-ज्ञाता-ज्ञात-भावाधिकरण-वीर्य विशेषेभ्यस्-तद्विशेषः॥६॥ अधिकरणं जीवाजीवाः॥७॥ आद्यं संरम्भ समारम्भारम्भ-योग-कृतकारिताऽनुमत कषायविशेषैस्-त्रिस्त्रिस्त्रिश्- चतुश्चैकशः॥८॥ निर्वर्तना-निक्षेप संयोग निसर्गा द्विचतुर्द्वित्रिभेदाः परम्॥९॥ तत्प्रदोष निह्नव मात्सर्यान्तराया-सादनोपघाता ज्ञानदर्शना- वरणयोः॥१०॥ दुःख शोक तापाक्रन्दन वध परिदेवना- न्यात्मपरोभय- स्थानान्यसद् वेद्यस्य॥११॥ भूतव्रत्य- नुकम्पादान-सराग संयमादियोगः क्षान्तिः शौचमिति सद्वेद्यस्य॥१२॥ केवलिश्रुत संघ धर्म-

देवाऽवर्णवादो दर्शनमोहस्य ॥१३॥ कषायोदयात्तीव्र-परिणामश्चारित्र- मोहस्य॥१४॥ बह्वारम्भपरिग्रहत्वं नारकस्याऽऽयुषाः ॥१५॥ माया तैर्यग्योनस्य॥१६॥ अल्पारम्भ -परिग्रहत्वं मानुषस्य॥१७॥ स्वभाव मार्दवं च॥१८॥ निःशीलव्रतत्वं च सर्वेषाम्॥१९॥ सरागसंयम संयमा-संयमाकामनिर्जरा बालतपांसि दैवस्य॥२०॥ सम्यक्त्वं च॥२१॥ योगवक्रता विसंवादनं-चाऽशुभस्य नाम्नः॥२२॥ तद्विपरीतं शुभस्य॥२३॥ दर्शनविशुद्धिर्- विनयसंपन्नता शीलव्रतेष्वनतिचारोऽभीक्ष्ण ज्ञानोपयोग संवेगौ शक्तितस्त्यागतपसी साधु-समाधिर्-वैयावृत्यकरण-मर्हदाचार्य-बहुश्रुत-प्रवचन-भक्तिराव‌ऽऽश्यकाऽपरिहाणि-र्मार्गप्रभावना- प्रवचन- वत्सलत्वमिति तीर्थकरत्वस्य ॥२४॥ परात्मनिन्दाप्रशंसे सदसद् गुणोच्छादनोद्-भावने च नीचैर्गोत्रस्य॥२५॥ तद्विपर्ययो नीचै-र्वृत्त्यनुत्सेकौ चोत्तरस्य॥२६॥ विघ्नकरण- मन्तरायस्य॥२७॥

॥ इति तत्त्वार्थाधिगमे मोक्षशास्त्रे षष्ठमोऽध्यायः नमो नमः ॥

यस्य नास्ति स्वयं प्रज्ञा, शास्त्रं तस्य करोति किं।
लोचनाभ्यां विहीनस्य दर्पणं किं करिष्यति॥

# 卐 सप्तम् अध्याय 卐

हिंसाऽनृतस्तेयाब्रह्म परिग्रहेभ्यो विरति-र्व्रतम् ॥१॥ देशसर्वतोऽणुमहती ॥२॥ तत्स्थैयार्थं भावनाः पञ्च पञ्च ॥३॥ वाङ्मनोगुप्तीर्याऽऽदान निक्षेपण समित्यालोकितपान- भोजनानि पञ्च ॥४॥ क्रोध- लोभ-भीरुत्वहास्यप्रत्याख्या- नान्यनुवीचि भाषणं च पञ्च ॥५॥ शून्यागार विमोचिता-वासपरोप-रोधाकरण भैक्ष्यशुद्धि सधर्माविसंवादाः पञ्च ॥६॥ स्त्रीराग कथा-श्रवण-तन्मनोहराङ्ग निरीक्षण-पूर्वरतानुस्मरण-वृष्येष्टरस-स्वशरीर-संस्कार त्यागाः पञ्च ॥७॥ मनोज्ञामनोज्ञेन्द्रियविषय राग-द्वेष वर्जनानि पञ्च ॥८॥ हिंसादिष्विहामुत्राऽपाया- वद्यदर्शनम् ॥९॥ दुःखमेव वा ॥१०॥ मैत्रीप्रमोद-कारुण्य माध्यस्थानि च सत्त्वगुणाधिक क्लिश्यमानाविनयेषु ॥११॥ जगत्कायस्वभावौ वा संवेग-वैराग्यार्थम् ॥१२॥ प्रमत्त योगात्प्राण व्यपरोपणं हिंसा ॥१३॥ अस-दभिधान-मनृतम् ॥१४॥ अदत्तादानं स्तेयम् ॥१५॥ मैथुन-मब्रह्म ॥१६॥ मूर्च्छा परिग्रहः ॥१७॥ निःशल्यो व्रती ॥१८॥ अगार्यनगारश्च ॥१९॥ अणुव्रतोऽगारी ॥२०॥ दिग्देशाऽनर्थदण्ड -विरति सामायिक प्रोषधोपवासोपभोग-

परिभोग परिमाणा -तिथिसंविभाग व्रतसम्पन्नश्च ॥२१॥ मारणान्तिकीं सल्लेखनां जोषिता ॥२२॥ शङ्का-कांक्षा-विचिकित्सान्य दृष्टि प्रशंसा संस्तवाः सम्यग्दृष्टे -रतिचाराः ॥२३॥ व्रतशीलेषु पञ्च पञ्च यथाक्रमम् ॥२४॥ बन्ध-वधच्छेदाति-भारारोपणान्न-पान निरोधाः ॥२५॥ मिथ्योपदेश रहोभ्याख्यान-कूटलेखक्रियान्यासापहार-साकार-मन्त्रभेदाः ॥२६॥ स्तेनप्रयोग तदाहृतादान- विरुद्ध-राज्यातिक्रम हीनाधिक-मानोन्मान प्रतिरूपक व्यवहाराः ॥२७॥ परविवाह-करणेत्वरिका परिगृहीता-ऽपरिगृहीता गमनाऽनङ्गक्रीडा काम-तीव्राभिनिवेशाः ॥२८॥ क्षेत्र वास्तु-हिरण्य सुवर्ण-धनधान्य-दासी दास कुप्य प्रमाणातिक्रमाः ॥२९॥ ऊर्ध्वाधस्-तिर्यग्व्यतिक्रम क्षेत्रवृद्धि-स्मृत्यन्तराधानानि ॥३०॥ आनयन प्रेष्यप्रयोग शब्द रूपानुपात -पुद्गलक्षेपाः ॥३१॥ कन्दर्प कौत्कुच्य मौखर्यासमीक्ष्याधि-करणोपभोगपरिभोगाऽऽनर्थक्यानि ॥३२॥ योगदुः-प्रणिधाना-नादर स्मृत्यनुपस्थानानि ॥३३॥ अप्रत्यवेक्षिताऽ-प्रमार्जितोत्सर्गादान संस्तरोपक्रमणानादर-स्मृत्यनुपस्थानानि ॥३४॥ सचित्त-सम्बन्ध सम्मिश्राभिषव

दुःपक्वाहारा: ॥३५॥ सचित्त- निक्षेपापिधान परव्यपदेश मात्सर्य्य कालाऽतिक्रमा: ॥३६॥ जीवितमरणाशंसा मित्रानुराग-सुखानुबन्ध निदानानि॥३७॥ अनुग्रहार्थं स्वस्यातिसर्गो दानम्॥३८॥ विधि-द्रव्य-दातृ-पात्र-विशेषात्तद्विशेषः॥३९॥

॥ इति तत्त्वार्थाधिगमे मोक्षशास्त्रे सप्तमोऽध्यायः नमो नमः ॥

## 卐 अष्टम् अध्याय 卐

मिथ्यादर्शनाऽविरति-प्रमाद-कषाय योगा बन्ध-हेतवः॥१॥ सकषायत्वाज्जीवः कर्मणो योग्यान् पुद्गलाना-ऽऽदत्ते स बन्धः॥२॥ प्रकृतिस्थित्यनुभाग प्रदेशास्-तद्- विधयः॥३॥ आद्यो ज्ञानदर्शनावरण- वेदनीय मोहनीयायुर्नाम गोत्रान्तरायाः॥४॥ पञ्चनवद्व्यष्टा-विंशति चतुर्द्विचत्वारिंशद् द्विपञ्चभेदा यथाक्रमम्॥५॥ मतिश्रुतावधि मनःपर्यय केवलानाम्॥६॥ चक्षु-रचक्षु-रवधि-केवलानां निद्रा-निद्रानिद्रा -प्रचला-प्रचलाप्रचला स्त्यानगृद्धयश्च ॥७॥ सदसद्-वेद्ये॥८॥ दर्शनचारित्र -मोहनीयाकषायकषाय वेदनीयाख्यास् त्रि द्वि नव षोडश-भेदाः-सम्यक्त्व-मिथ्यात्व तदुभयान्यकषाय- कषायौ हास्य रत्यरति शोक भय जुगुप्सा स्त्रीपुन्नपुंसकवेदा अनन्तानुबन्ध्यप्रत्याख्यानप्रत्याख्यान-

संज्वलन विकल्पा- श्चैकशः क्रोधमानमायालोभाः ॥९॥ नारकतैर्यग्योन-मानुष- दैवानि ॥१०॥ गति-जाति- शरीराङ्गोपाङ्ग- निर्माण- बन्धन- सङ्घात- संस्थान- संहननस्पर्श- रस- गन्ध- वर्णानुपूर्व्यागुरुलघुपघात परघातातपोद्योतोच्छ्वास विहायोगतयः प्रत्येकशरीर-त्रस- सुभग सुस्वर शुभ सूक्ष्म पर्याप्तिस्थिरादेय यशःकीर्ति सेतराणि तीर्थकरत्वं च ॥११॥ उच्चैर्नीचैश्च ॥१२॥ दान-लाभ- भोगोपभोग वीर्याणाम् ॥१३॥ आदितस्ति- सृणामन्तरायस्य- च-त्रिंशत्सागरोपम-कोटीकोट्यः परा स्थितिः ॥१४॥ सप्ततिर्मोहनीयस्य ॥१५॥ विंशतिर्नाम-गोत्रयोः ॥१६॥ त्रयस्त्रिंशत्-सागरोपमाण्यायुषः ॥१७॥ अपरा द्वादशमुहूर्ता वेदनीयस्य ॥१८॥ नामगोत्रयोरष्टौ ॥१९॥ शेषाणा- मन्तर्मुहूर्ता ॥२०॥ विपाकोऽनुभवः ॥२१॥ स यथानाम ॥२२॥ ततश्च निर्जरा ॥२३॥ नाम-प्रत्ययाः सर्वतो योग-विशेषात् सूक्ष्मैकक्षेत्रावगाहस्थिताः सर्वात्मप्रेदेशेष्वनन्तानन्त प्रदेशाः ॥२४॥ सद्वेद्य शुभायुर्नाम गोत्राणि पुण्यम् ॥२५॥ अतोऽन्यत्पापम् ॥२६॥

॥ इति तत्त्वार्थाधिगमे मोक्षशास्त्रे अष्टमोऽध्यायः नमो नमः ॥

## 卐 नवम् अध्याय 卐

आस्त्रव-निरोधः संवरः ॥१ ॥ स गुप्तिसमिति-धर्मानुप्रेक्षा परीषहजय-चारित्रैः ॥२ ॥ तपसा निर्जरा च ॥३ ॥ सम्यग्योग-निग्रहो गुप्तिः ॥४ ॥ ईर्याभाषैषणादान निक्षेपोत्सर्गाः समितयः ॥५ ॥ उत्तमक्षमा- मार्दवार्जव-शौचसत्यसंयम-तपस्त्यागाकिञ्चन्य ब्रह्मचर्याणि धर्मः ॥६ ॥ अनित्याशरण-संसारैकत्वान्यत्वाशुच्यास्त्रव संवर निर्जरा लोक-बोधिदुर्लभ-धर्मस्वाख्याततत्त्वानु-चिन्तनमनुप्रेक्षाः ॥७ ॥ मार्गाच्यवन निर्जरार्थं परिषोढव्याः परीषहाः ॥८ ॥ क्षुत्पिपासा शीतोष्ण-दंशमशक नाग्न्यारति स्त्रीचर्या निषद्याशय्याक्रोश-वध-याचनालाभ रोगतृण-स्पर्श-मल सत्कार पुरस्कार प्रज्ञाज्ञाना- ऽदर्शनानि ॥९ ॥ सूक्ष्मसाम्पराय छद्मस्थ वीतरागयो- श्चतुर्दश ॥१० ॥ एकादश जिने ॥११ ॥ बादरसाम्पराये सर्वे ॥१२ ॥ ज्ञानावरणे प्रज्ञाऽज्ञाने ॥१३ ॥ दर्शनमोहान्तराययो-रदर्शनालाभौ ॥१४ ॥ चारित्रमोहे नाग्न्यारतिस्त्री- निषद्याऽऽ-क्रोश-याचना-सत्कार पुरस्काराः ॥१५ ॥ वेदनीये शेषाः ॥१६ ॥

एकादयो भाज्यायुग- पदेकस्मिन्नैकोन- विंशतेः ॥१७॥ सामायिक-च्छेदोपस्थापना परिहार-विशुद्धि सूक्ष्मसाम्पराय यथाख्यातमिति चारित्रम् ॥१८॥ अनशनावमौदर्य वृत्ति-परिसंख्यान रसपरित्याग- विविक्तशय्यासन-कायक्लेशा बाह्यं तपः ॥१९॥ प्रायश्चित्त- विनय-वैयावृत्त्य स्वाध्याय-व्युत्सर्ग-ध्यानान्युत्तरम् ॥२०॥ नवचतुर्दश-पञ्च- द्विभेदा यथाक्रमं प्राग्ध्यानात् ॥२१॥ आलोचना प्रतिक्रमण-तदुभय विवेक व्युत्सर्ग तपश्छेद परिहारोपस्थापनाः ॥२२॥ ज्ञानदर्शनचारित्रोपचाराः ॥२३॥ आचार्योपाध्याय तपस्वि शैक्ष्यग्लान-गण-कुल सङ्घ साधु मनोज्ञानाम् ॥२४॥ वाचना-पृच्छनानुप्रेक्षाम्नाय धर्मोपदेशाः ॥२५॥ बाह्याभ्यन्त-रोपध्योः ॥२६॥ उत्तम-संहननस्यैकाग्र चिन्तानिरोधो ध्यानमान्तर्मुहूर्तात् ॥२७॥ आर्त्त-रौद्र-धर्म्य- शुक्लानि ॥२८॥ परे मोक्षहेतू ॥२९॥ आर्त-ममनोज्ञस्य संप्रयोगे तद्विप्रयोगाय स्मृति समन्वाहारः ॥३०॥ विपरीतं मनोज्ञस्य ॥३१॥ वेदनायाश्च ॥३२॥ निदानं च ॥३३॥ तदविरत देश-विरतप्रमत्तसंयतानाम् ॥३४॥ हिंसानृतस्तेय विषय-संरक्षणेभ्यो-रौद्रमविरत-

देशविरतयोः ॥३५॥ आज्ञाऽपाय-विपाक- संस्थानविचयाय धर्म्यम् ॥३६॥ शुक्ले चाद्ये पूर्वविदः ॥३७॥ परे केवलिनः ॥३८॥ पृथक्त्वैकत्ववितर्क सूक्ष्मक्रियाप्रति-पाति-व्युपरत क्रियानिवर्तीनि ॥३९॥ त्र्येकयोग काययोगाऽयोगानाम् ॥४०॥ एकाश्रये सवितर्कवीचारे पूर्वे ॥४१॥ अवीचारं द्वितीयम् ॥४२॥ वितर्कः-श्रुतम् ॥४३॥ वीचारोऽर्थ व्यञ्जन योगसंक्रान्तिः ॥४४॥ सम्यग्दृष्टि-श्रावक विरतानन्त- वियोजक-दर्शनमोह क्षपकोपशमकोपशान्त-मोहक्षपक क्षीणमोहजिनाः क्रमशोऽसंख्येय- गुणनिर्जरा ॥४५॥ पुलाक-बकुश-कुशील-निर्ग्रन्थ-स्नातका निर्ग्रन्थाः ॥४६॥ संयमश्रुत प्रतिसेवना-तीर्थ-लिङ्ग-लेश्योपपादस्थान विकल्पतः साध्याः ॥४७॥

॥ इति तत्त्वार्थाधिगमे मोक्षशास्त्रे नवमोऽध्यायः नमो नमः ॥

## 卐 दशम् अध्याय 卐

मोहक्षयाज्ज्ञान-दर्शनावरणान्तराय क्षयाच्च केवलम् ॥१॥ बन्धहेत्वभाव निर्जराभ्यां कृत्स्न कर्म-विप्रमोक्षो

मोक्षः ॥२॥ औपशमिकादि भव्यत्वानां च ॥३॥ अन्यत्र केवल-सम्यक्त्वज्ञान-दर्शन सिद्धत्वेभ्यः ॥४॥ तदनन्तरमूर्ध्वं गच्छत्याऽऽलोकान्तात् ॥५॥ पूर्वप्रयोगा-दसङ्गत्वाद्-बन्धच्छेदात् तथागति-परिणामाच्च ॥६॥ आविद्ध-कुलालचक्रवद्- व्यपगतलेपालाम्बु-वदेरण्डबीज- वदग्नि शिखावच्च ॥७॥ धर्मास्तिकायाभावात् ॥८॥ क्षेत्र काल गति लिङ्ग तीर्थ चारित्र प्रत्येकबुद्ध बोधित- ज्ञानाऽवगाहनान्तर संख्याल्पबहुत्वतः साध्याः ॥९॥

॥ इति तत्त्वार्थाधिगमे मोक्षशास्त्रे दशमोऽध्यायः नमो नमः ॥१०॥

अक्षर-मात्र-पदस्वर-हीनं, व्यञ्जन संधि-विवर्जितरेफम्।
साधुभिरत्र मम क्षमितव्यं, को न विमुह्यति शास्त्रसमुद्रे ॥१॥

दशाध्याये-परिच्छिन्ने, तत्त्वार्थे पठिते सति।
फलं स्यादुपवासस्य, भाषितं मुनिपुङ्गवैः ॥२॥

तत्त्वार्थ-सूत्रकर्त्तारं, गृद्ध-पिच्छोपलक्षितम्।
वन्दे गणीन्द्रसंजात, मुमास्वामिमुनीश्वरम् ॥३॥

पढम चउक्के पढमं, पंचमए जाण पुग्गलं तच्च।
छहसत्तेमि हि आस्सव, अट्ठमे बंध णायव्वो॥४॥

णवमे संवर णिज्जर, दहमे मोक्खं वियाणे हि।
इह सत्त तच्च भणियं, दह सुत्ते मुणिवरिं देहिं॥५॥

जं सक्कइ तं कीरइ, जं च ण सक्कइ तहेव सद्दहणं।
सद्दहमाणो जीवो, पावइ अजरामरं ठाणं॥६॥

तवयरणं वयधरणं, संजमसरणं च जीवदयाकरणम्।
अन्ते समाहिमरणं, चउविह दुक्खं णिवारेई॥७॥

कोटीशतं द्वादशचैव कोट्यो लक्षाण्यशीतिस्त्र्यधिकानि चैव।
पंचाशदष्टौ च सहस्र संख्या, मेतच्छ्रुतं पंच पदं नमामि॥८॥

अरहंत भासियत्थं, गणहरदेवेहिं गंथियं सम्मम्।
पणमामि भत्तिजुत्तो, सुदणाणमहोवहिं सिरसा॥९॥

गुरवः पांतु नो नित्यं, ज्ञानदर्शन नायकाः।
चारित्रार्णव गम्भीराः, मोक्षमार्गोपदेशकाः॥१०॥

॥ इति तत्त्वार्थासूत्रापरनाम मोक्षशास्त्रं समाप्तम्॥

# इष्टोपदेशः

(श्रीमत् पूज्यपादाचार्य विरचित)

यस्य स्वयं स्वभावाप्ति-रभावे कृत्स्नकर्मणः।
तस्मै संज्ञानरूपाय नमोऽस्तु परमात्मने॥१॥

योग्योपादानयोगेन दृषदः स्वर्णता मता।
द्रव्यादिस्वादि संपत्तावात्मनोऽप्यात्मता मता॥२॥

वरं व्रतैः पदं दैवं, नाव्रतैर्वत् नारकम्।
छायातपस्थयोर्भेदः, प्रतिपालयतोर्महान्॥३॥

यत्र भावः शिवं दत्ते, द्यौः कियद् दूरवर्तिनी।
यो नयत्याशु गव्यूतिं, क्रोशार्द्धे किं स सीदति ?॥४॥

हृषीक जमनातङ्कं दीर्घ कालो पलालितम्।
नाके नाकौकसां सौख्यं, नाके नाकौकसामिव॥५॥

वासना मात्र मेवैतत् सुखं दुःखं च देहिनाम्।
तथा ह्युद्वेजयन्त्येते, भोगा रोगा इवापदि॥६॥

मोहेन संवृतं ज्ञानं, स्वभावं लभते न हि।
मत्तः पुमान् पदार्थानां यथा मदनकोद्रवैः॥७॥

वपुर्गृहं धनं दाराः, पुत्रा मित्राणि शत्रवः।
सर्वथान्यस्वभावानि, मूढः स्वानि प्रपद्यते॥८॥

दिग्देशेभ्यः खगा एत्य, संवसन्ति नगे नगे।
स्वस्वकार्य वशाद्यान्ति, देशे दिक्षु प्रगे प्रगे॥९॥

विराधकः कथं हन्त्रे, जनाय परिकुप्यति।
त्र्यङ्गुलं पातयन् पद्भ्यां स्वयं दण्डेन पात्यते॥१०॥

रागद्वेषद्वयीदीर्घ - नेत्राकर्षण कर्मणा।
अज्ञानात्सुचिरं जीवः, संसाराब्धौ भ्रमत्यसौ॥११॥

विपद्भवपदावर्ते, पदिकेवातिवाह्यते।
यावत्तावद्भवन्त्यन्याः, प्रचुरा विपदः पुरः॥१२॥

दुरर्ज्येनासुरक्ष्येण, नश्वरेण धनादिना।
स्वस्थंमन्यो जनः कोऽपि ज्वरवानिव सर्पिषा॥१३॥

विपत्तिमात्मनो मूढः, परेषामिव नेक्षते
दह्यमान मृगाकीर्ण वनान्तरतरुस्थवत्॥१४॥

आयुर्वृद्धिक्षयोत्कर्षहेतुं कालस्य निर्गमम्।
वाञ्छतां धनिनामिष्टं, जीवितात्सुतरां धनम्॥१५॥

त्यागाय श्रेयसे वित्तमवित्तः संचिनोति यः
स्वशरीरं स पङ्केन, स्नास्यामीति विलिम्पति॥१६॥

आरम्भे तापकान् प्राप्तवतृप्ति प्रतिपादकान्।
अन्ते सुदुस्त्यजान् कामान् कामं कः सेवते सुधीः॥१७॥

भवन्ति प्राप्य यत्सङ्गमशुचीनि शुचीन्यपि।
स कायः संततापायस्तदर्थं प्रार्थना वृथा॥१८॥

यज्जीवस्योपकाराय, तद्देहस्यापकारकम्।
यद्देहस्योपकाराय, तज्जीवस्यापकारकम्॥१९॥

इतश्चिन्तामणिर्दिव्य इतः पिण्याकखण्डकम्।
ध्यानेन चेदुभे लभ्ये क्वाद्रियन्तां विवेकिनः॥२०॥

स्वसंवेदन सुव्यक्तस्तनुमात्रो निरत्ययः।
अत्यन्तसौख्यवानात्मा, लोकालोकविलोकनः॥२१॥

संयम्य करणग्राममेकाग्रत्वेन चेतसः।
आत्मानमात्मवान् ध्यायेदात्मनैवात्मनि स्थितम्॥२२॥

अज्ञानोपास्तिरज्ञानं, ज्ञानं ज्ञानिसमाश्रयः।
ददाति यत्तु यस्यास्ति, सुप्रसिद्धमिदं वचः॥२३॥

परीषहाद्यविज्ञानादास्त्रवस्य निरोधिनी।
जायतेऽध्यात्मयोगेन, कर्मणामाशु निर्जरा॥२४॥

कटस्य कर्त्ताहमिति, संबंधः स्याद् द्वयोर्द्वयोः।
ध्यानं ध्येयं यदात्मैव, संबंधः कीदृशस्तदा॥२५॥

बध्यते मुच्यते जीवः, सममो निर्ममः क्रमात्।
तस्मात्सर्वप्रयत्नेन, निर्ममत्वं विचिन्तयेत्॥२६॥

एकोऽहं निर्ममः शुद्धो, ज्ञानी योगीन्द्रगोचरः।
बाह्याः संयोगजा भावा, मत्तः सर्वेऽपि सर्वथा॥२७॥

दुःखसंदोहभागित्वं संयोगादिह देहिनाम्।
त्यजाम्येनं ततः सर्वं, मनोवाक्कायकर्मभिः॥२८॥

न मे मृत्युः कुतो भीतिर् न मे व्याधिः कुतो व्यथा।
नाहं बालो न वृद्धोऽहं, न युवैतानि पुद्गले॥२९॥

भुक्तोज्झिता मुहुर्मोहान् मया सर्वेऽपि पुद्गलाः।
उच्छिष्टेष्विव तेष्वद्य, मम विज्ञस्य का स्पृहा॥३०॥

कर्म कर्महिताबन्धि, जीवो जीवहितस्पृहः।
स्वस्वप्रभावभूयस्त्वे, स्वार्थं को वा न वाञ्छति॥३१॥

परोपकृतिमुत्सृज्य, स्वोपकारपरो भव।
उपकुर्वन्परस्याज्ञो, दृश्यमानस्य लोकवत्॥३२॥

गुरुपदेशादभ्यासात्संवित्तेः स्वपरान्तरम्।
जानाति यः स जानाति, मोक्षसौख्यं निरन्तरम्॥३३॥

स्वस्मिन् सदभिलाषित्वादभीष्टज्ञाप कत्वतः।
स्वयं हितप्रयोक्तृत्वादात्मैव गुरुरात्मनः॥३४॥

नाज्ञो विज्ञत्वमायाति, विज्ञो नाज्ञत्वमृच्छति।
निमित्तमात्रमन्यस्तु, गतेर्धर्मास्तिकायवत्॥३५॥

अभवच्चित्तविक्षेप, एकान्ते तत्त्वसंस्थितः।
अभ्यस्येदभियोगेन, योगी तत्त्वं निजात्मनः॥३६॥

यथा यथा समायाति, संवित्तौ तत्त्वमुत्तमम्।
तथा तथा न रोचन्ते, विषयाः सुलभा अपि॥३७॥

यथा यथा न रोचन्ते, विषयाः सुलभा अपि।
तथा तथा समायाति संवित्तौ तत्त्वमुत्तमम्॥३८॥

निशामयति निश्शेषमिन्द्रजालोपमं जगत्।
स्पृहयत्यात्मलाभाय, गत्वान्यत्रानुतप्यते॥३९॥

इच्छत्येकान्तसंवासं, निर्जनं जनितादरः।
निजकार्यवशात्किंचि-दुक्त्वा विस्मरति द्रुतम्॥४०॥

ब्रुवन्नपि हि न ब्रूते, गच्छन्नपि न गच्छति।
स्थिरीकृतात्मतत्त्वस्तु, पश्यन्नपि न पश्यति॥४१॥

किमिदं कीदृशं कस्य, कस्मात्क्वेत्यविशेषयन्।
स्वदेहमपि नावैति, योगी योगपरायणः॥४२॥

यो यत्र निवसन्नास्ते, स तत्र कुरुते रतिम्।
यो यत्र रमते तस्मादन्यत्र स न गच्छति॥४३॥

अगच्छंस्तद्विशेषाणा - मनभिज्ञश्च जायते।
अज्ञाततद्विशेषस्तु, बद्धयते न विमुच्यते॥४४॥

परः परस्ततो दुःखमात्मैवात्मा ततः सुखम्।
अतएव महात्मानस्तन्निमित्तं कृतोद्यमाः॥४५॥

अविद्वान् पुद्गलद्रव्यं, योऽभिनन्दति तस्य तत्।
न जातु जन्तोः सामीप्यं, चतुर्गतिषु मुंचति॥४६॥

आत्मानुष्ठाननिष्ठस्य, व्यवहारबहिः स्थितेः।
जायते परमानन्दः, कश्चिद्योगेन योगिनः॥४७॥

आनन्दो निर्दहत्युद्धं कर्मेन्धनमनारतम्।
न चासौ खिद्यते योगी, बहिर्दुःखेष्वचेतनः॥४८॥

अविद्याभिदुरं ज्योतिः, परं ज्ञानमयं महत्।
तत्प्रष्टव्यं तदेष्टव्यं, तद् द्रष्टव्यं मुमुक्षुभिः॥४९॥

जीवोऽन्यः पुद्गलश्चान्य इत्यसौ तत्त्वसंग्रहः।
यदन्यदुच्यते किंचित्, सोऽस्तु तस्यैव विस्तरः॥५०॥

इष्टोपदेशमिति सम्यगधीत्य धीमान्,
मानापमानसमतां स्वमताद्वितन्य।
मुक्ताग्रहो विनिवसन् सजने वने वा,
मुक्तिश्रियं निरुपमामुपयाति भव्यः॥५१॥

(इति इष्टोपदेश समाप्त)

उद्यमः साहसं धैर्यं बुद्धि शक्ति पराक्रमः।
षडेते यत्र वर्तन्ते तत्र देवः सहायकृत॥

# द्रव्य-संग्रहः

(श्रीमत् नेमिचन्द्रसिद्धान्तिदेव विरचित)

जीवमजीवं दव्वं, जिणवरवसहेण जेण णिद्दिट्ठं।
देविंद-विंद वंदं, वंदे तं सव्वदा सिरसा॥१॥

जीवो उवओगमओ, अमुत्ति कत्ता सदेहपरिमाणो।
भोत्ता संसारत्थो, सिद्धो सो विस्ससोड्ढगई॥२॥

तिक्काले-चदुपाणा, इंदिय-बल-माउ-आणपाणो य।
ववहारा सो जीवो, णिच्चय-णयदो दु चेदणा जस्स॥३॥

उवओगो दुवियप्पो, दंसण णाणं च दंसणं चदुधा।
चक्खु अचक्खू ओही, दंसणमध केवलं णेयं॥४॥

णाणं अट्ठवियप्पं, मदि-सुद-ओही-अणाण-णाणाणि।
मणपज्जय-केवलमवि, पच्चक्ख-परोक्खभेयं च॥५॥

अट्ठ-चदु-णाण-दंसण, सामण्णं जीवलक्खणं भणियं।
ववहारा सुद्धणया, सुद्धं पुण दंसणं णाणं॥६॥

वण्ण रस पंच गंधा, दो फासा अट्ठ णिच्छया जीवे।
णो संति अमुत्ति तदो, ववहारा मुत्ति बंधादो॥७॥

पुग्गलकम्मादीणं, कत्ता ववहारदो दु णिच्चयदो।
चेदण-कम्माणादा, सुद्धणया सुद्धभावाणं॥८॥

ववहारा सुहदुक्खं, पुग्गलकम्मप्फलं पभुंजेदि।
आदा णिच्छयणयदो, चेदणभावं खु आदस्स॥९॥

अणु-गुरु-देह-पमाणो, उवसंहारप्पसप्पदो चेदा।
असमुहदो ववहारा, णिच्छयणयदो असंखदेसो वा॥१०॥

पुढवि-जल-तेउ-वाऊ, वणप्फदी-विविह थावरे इंदी।
विग-तिग-चदु-पंचक्खा, तस-जीवा होंति संखादी॥११॥

समणा अमणा णेया पंचिंदिय णिम्मणा परे सव्वे।
बादर-सुहुमे इंदी, सव्वे पज्जत्त इदरा य॥१२॥

मग्गण-गुण-ठाणेहिं य, चउदसहि हवंति तह असुद्धणया।
विण्णेया संसारी, सव्वे सुद्धा हु सुद्धणया॥१३॥

णिक्कम्मा अट्ठगुणा, किंचूणा चरमदेहदो सिद्धा।
लोयग्गठिदा णिच्चा, उप्पादवयेहिं संजुत्ता॥१४॥

अज्जीवो पुणणेओ, पुग्गल धम्मो अधम्म आयासं।
कालो पुग्गल-मुत्तो, रूवादिगुणो अमुत्ति सेसा दु (हु)॥१५॥

सद्दो बंधो सुहुमो, थूलो संठाण-भेद-तम-छाया।
उज्जोदादव-सहिया, पुग्गल-दव्वस्स पज्जाया॥१६॥

गइ-परिणयाण धम्मो, पुग्गल-जीवाण गमण-सहयारी।
तोयं जह मच्छाणं, अच्छंता णेव सो णेई॥१७॥

ठाण-जुदाण अधम्मो, पुग्गल जीवाण ठाण सहयारी।
छाया जह पहियाणं, गच्छंता णेव सो धरई॥१८॥

अवगास-दाण-जोग्गं, जीवादीणं वियाण आयासं।
जेण्हं लोगागासं, अल्लोगागासमिदि दुविहं॥१९॥

धम्माऽधम्मा कालो, पुग्गल जीवा य संति जावदिये।
आयासे सो लोगो, तत्तो परदो अलोगुत्तो॥२०॥

दव्व-परिवट्टरूवो, जो सो कालो हवेइ ववहारो।
परिणामादी लक्खो, वट्टणलक्खो य परमट्ठो॥२१॥

लोयायास-पदेसे, इक्केक्के जे ठिया हु इक्केक्का।
रयणाणं रासीमिव, ते कालाणू असंख-दव्वाणि॥२२॥

एवं छब्भेयमिदं, जीवा-जीवप्प-भेददो दव्वं।
उत्तं कालविजुत्तं, णायव्वा पंच अत्थिकाया दु॥२३॥

संति जदो तेणेदे, अत्थित्ति भणंति जिणवरा जम्हा।
काया इव बहुदेसा, तम्हा काया य अत्थिकाया य॥२४॥

होंति असंखा जीवे, धम्मा-धम्मे अणंत-आयासे।
मुत्ते तिविह-पदेसा, कालस्सेगो ण तेण सो काओ॥२५॥

एयपदेसो वि अणु, णाणा-खंधप्पदेसदो होदि।
बहुदेसो उवयारा, तेण य काओ भणंति सव्वण्हु॥२६॥

जावदियं आयासं, अविभागी-पुग्गलाणु-वट्टद्धं।
तं खु पदेसं जाणे, सव्वाणुट्ठाण-दाणरिहं॥२७॥

आसव बंधण-संवर-णिज्जर-मोक्खो सपुण्ण-पावा जे।
जीवाजीव-विसेसा, ते वि समासेण पभणामो॥२८॥

आसवदि जेण कम्मं, परिणामेणप्पणो स विण्णेओ।
भावासवो जिणुत्तो, कम्मासवणं परो होदि॥२९॥

मिच्छत्ताविरदि-पमाद-जोग-कोहादओऽथ विण्णेया।
पण-पण पणदह-तिय-चदु, कमसो भेदा दु पुव्वस्स॥३०॥

णाणावरणादीणं, जोग्गं जं पुग्गलं समासवदि।
दव्वासवो स णेओ, अणेयभेओ जिणक्खादो॥३१॥

बज्झदि कम्मं जेण दु चेदण-भावेण भावबंधो सो।
कम्माद पदेसाणं अण्णोण्ण-पवेसणं इदरो॥३२॥

पयडिट्ठिदि-अणुभागप्पदेसभेदा दु चदुविधो बंधो।
जोगा पयडिपदेसा, ठिदि अणुभागा कसायदो होंति॥३३॥

चेदणपरिणामो जो, कम्मस्सासव णिरोहणे हेऊ।
सो भावसंवरो खलु, दव्वासवरोहणे अण्णो॥३४॥

वद-समिदी-गुत्तीओ, धम्माणुपेहा परीसहजओ य।
चारित्तं बहुभेया, णायव्वा भावसंवर-विसेसा॥३५॥

जहकालेण तवेण य, भुत्तरसं कम्म-पुग्गलं जेण।
भावेण सडदि णेया, तस्सडणं चेदि णिज्जरा दुविहा॥३६॥

सव्वस्स कम्मणो जो, खयहेदू अप्पणो हु परिणामो।
णेओ स भावमोक्खो, दव्वविमोक्खो य कम्मपुधभावो॥३७॥

सुह-असुह-भावजुत्ता, पुण्णं पावं हवंति खलु जीवा।
सादं सुहाउ णामं, गोदं पुण्णं पराणि पावं च॥३८॥

सम्मद्दंसण-णाणं, चरणं मोक्खस्स कारणं जाणे।
ववहारा णिच्छयदो, तत्तियमइयो णिओ अप्पा॥३९॥

रयणत्तयं ण वट्टइ, अप्पाणं मुयत्तु अण्णदवियम्हि।
तम्हा तत्तियमइओ, होदि हु मोक्खस्स कारणं आदा॥४०॥

जीवादीसद्दहणं, सम्मत्तं रूवमप्पणो तं तु।
दुरभिणिवेस विमुक्कं, णाणं सम्मं खु होदि सदि जम्हि॥४१॥

संसय-विमोह-विब्भम-विवज्जियं अप्पपरसरूवस्स।
गहणं सम्मंणाणं, सायारमणेयभेयं च॥४२॥

जं सामण्णं गहणं, भावाणं णेव कट्टुमायारं।
अविसेसिदूण अट्ठे, दंसणमिदि भण्णये समये॥४३॥

दंसणपुव्वं णाणं छदुमत्थाणं ण दोण्णि उवओगा।
जुगवं जम्हा केवलिणाहे जुगवं तु ते दो वि॥४४॥

असुहादो विणिवित्ति, सुहे पवित्ती य जाण चारित्तं।
वद-समिदि-गुत्तिरूवं, ववहारणया दु जिणभणियं॥४५॥

बहिरब्भंतर-किरियारोहो भव-कारणप्पणासट्ठं।
णाणिस्स जं जिणुत्तं, तं परमं सम्मचारित्तं॥४६॥

दुविहं पि मोक्ख-हेउ, झाणे पाउणदि जं मुणी णियमा।
तम्हा पयत्तचित्ता, जूयं झाणं समब्भसह॥४७॥

मा मुज्झह मा रज्जह, मा दुस्सह इट्ठणिट्ठ-अत्थेसु।
थिरमिच्छह जइ चित्तं, विचित्त-झाणप्पसिद्धीए॥४८॥

पणतीस-सोल-छप्पण, चदु-दुगमेगं च जवह झाएह।
परमेट्ठिवाचयाणं, अण्णं च गुरुवएसेण॥४९॥

णट्ठ-चदु-घाइ-कम्मो, दंसण-सुह-णाणवीरियमइओ।
सुहदेहत्थो अप्पा, सुद्धो अरिहो विचिंतिज्जो॥५०॥

णट्ठट्ठ-कम्म-देहो, लोयालोयस्स जाणओ दट्ठा।
पुरिसायारो अप्पा, सिद्धो झाएह लोएसिहरत्थो॥५१॥

दंसणणाण-पहाणे-वीरिय-चारित्त-वर-तवायारे।
अप्पं परं च जुंजइ, सो आइरिओ मुणी झेओ॥५२॥

जो रयणत्तयजुत्तो, णिच्चं धम्मोवएसणे णिरदो।
सो उवझाओ अप्पा, जदिवरवसहो णमो तस्स॥५३॥

दंसण-णाण-समग्गं-मग्गं मोक्खस्स जो हु चारित्तं।
साधयदि णिच्चसुद्धं, साहूसो मुणी णमो तस्स॥५४॥

जं किंचि वि चिंतंतो, णिरीहवित्ती हवे जदा साहू।
लद्धूण य एयत्तं, तदा हु तं तस्स णिच्चयं झाणं॥५५॥

मा चिट्ठह मा जंपह, मा चिंतह किं वि जेण होई थिरो।
अप्पा अप्पम्मि रओ, इणमेव परं हवे झाणं॥५६॥

तवसुद-वदवं चेदा, झाण-रह-धुरंधरो हवे जम्हा।
तम्हा तत्तियणिरदा, तल्लद्धीए सदा होइ॥५७॥

दव्वसंगहमिणं मुणिणाहा, दोससंचयचुदा सुदपुण्णा।
सोधयंतु तणुसुत्तधरेण, णेमिचंदमुणिणा भणियं जं॥५८॥

इति द्रव्य संग्रह

निन्दा का फल

देवनिन्दी दरिद्री स्यात् गुरु निन्दी च पातकी।
स्वामि निन्दी भवेत् कुष्ठी गोत्र निन्दी कुलक्षयी॥

# रत्नकरण्ड-श्रावकाचारः

लेखक : ''श्रीमत्स्वामि समन्तभद्राचार्य-विरचितो''

## अथ प्रथमोध्यायः

मङ्गलाचरणम्

नमः श्री वर्द्धमानाय, निर्द्धूतकलिलात्मने।
सालोकानां त्रिलोकानां, यद्विद्या दर्पणायते॥१॥
देशयामि समीचीनं, धर्मं कर्मनिबर्हणम्।
संसार दुःखतः सत्त्वान्, यो धरत्युत्तमे सुखे॥२॥
सद्दृष्टि ज्ञान वृत्तानि, धर्मं धर्मेश्वरा विदुः।
यदीय प्रत्यनीकानि, भवन्ति भव पद्धतिः॥३॥
श्रद्धानं परमार्थाना, माप्तागमतपोभृताम्।
त्रिमूढापोढमष्टाङ्गं सम्यग्दर्शनमस्मयम्॥४॥
आप्तेनोच्छिन्न दोषेण, सर्वज्ञेनागमेशिना।
भवितव्यं नियोगेन, नान्यथा ह्याप्तता भवेत्॥५॥
क्षुत्पिपासा जरातङ्क-, जन्माऽन्तक-भयस्मयाः।
न रागद्वेष मोहाश्च, यस्याप्तः सः प्रकीर्त्यते॥६॥

परमेष्ठी परंज्योति, र्विरागो विमलः कृती।
सर्वज्ञोऽनादि मध्यान्तः, सार्वः शास्तोपलाल्यते ॥७॥
अनात्मार्थं विना रागैः, शास्ता शास्ति सतो हितम्।
ध्वनन् शिल्पिकरस्पर्शान्, मुरजः किमपेक्षते ॥८॥
आप्तोपज्ञमनुल्लंघ्य, मदृष्टेष्ट विरोधकम्।
तत्त्वोपदेश कृत्सार्वं, शास्त्रं कापथघट्टनम् ॥९॥
विषयाशा वशातीतो, निरारम्भोऽपरिग्रहः।
ज्ञानध्यान तपो रक्तस्-तपस्वी सः प्रशस्यते ॥१०॥

सम्यक्त्वस्याष्टाङ्गानि

इदमेवेदृशमेव, तत्त्वं नान्यन्न चान्यथा।
इत्यकम्पाय साम्भोवत्, सन्मार्गेऽसंशया रुचिः ॥११॥
कर्मपरवशे सान्ते, दुःखैरन्तरितोदये।
पाप बीजे सुखेऽनास्था, श्रद्धाऽनाकाङ्क्षणा स्मृता ॥१२॥
स्वभावतोऽशुचौ काये, रत्नत्रय पवित्रिते।
निर्जुगुप्सा गुणप्रीति, र्मता निर्विचिकित्सता ॥१३॥
कापथे पथि दुःखानां, कापथस्थेऽप्य सम्मतिः।
असंपृक्ति रनुत्कीर्ति-रमूढ़ा दृष्टि रुच्यते ॥१४॥

स्वयं शुद्धस्य मार्गस्य, बालाशक्तजनाश्रयाम्।
वाच्यतां यत्प्रमार्जन्ति, तद्वदन्त्युपगूहनम्॥१५॥
दर्शनाच्चरणाद्वापि, चलतां धर्मवत्सलैः।
प्रत्यवस्थापनं प्राज्ञैः स्थितिकरण मुच्यते॥१६॥
स्वयूथ्यान्प्रति सद्भाव, सनाथापेतकैतवा।
प्रतिपत्तिर्यथायोग्यं, वात्सल्यमभिलप्यते॥१७॥
अज्ञानतिमिर व्याप्ति, मपाकृत्य यथायथम्।
जिनशासन माहात्म्य, प्रकाशः स्यात्प्रभावना॥१८॥
तावदञ्जन चौरोऽङ्गे, ततोऽनन्तमती स्मृता।
उद्दायनस्तृतीयेऽपि, तुरीये रेवती मता॥१९॥
ततो जिनेन्द्रभक्तोऽन्यो, वारिषेणस्ततः परः।
विष्णुश्च वज्रनामा च, शेषयो-र्लक्ष्यतां गतौ॥२०॥
नाङ्ग हीनमलं छेत्तुं, दर्शनं जन्मसन्ततिम्।
न हि मन्त्रोऽक्षरन्यूनो, निहन्ति विषवेदनाम्॥२१॥
आपगासागरस्नानमुच्चयः सिकताश्मनाम्।
गिरिपातोऽग्निपातश्च लोकमूढं निगद्यते॥२२॥

वरोपलिप्सयाशावान्, रागद्वेषमलीमसः।
देवता यदुपासीत, देवतामूढ़मुच्यते ॥२३॥
सग्रन्थारम्भहिंसानां, संसारावर्त वर्तिनाम्।
पाखण्डिनां पुरस्कारो, ज्ञेयं पाखण्डिमोहनम्॥२४॥
ज्ञानं पूजां कुलं जातिं बलमृद्धिं तपो वपुः।
अष्टावाश्रित्य मानित्वं, स्मयमाहुर्गतस्मयाः॥२५॥
स्मयेनयोऽन्यानत्येति, धर्मस्थान् गर्विताशयः।
सोऽत्येति धर्ममात्मीयं, न धर्मो धार्मिकै बिंना॥२६॥
यदि पापनिरोधोऽन्य, सम्पदा किं प्रयोजनम्।
अथ पापास्रवोऽस्त्यन्य, सम्पदा किं प्रयोजनम्॥२७॥
सम्यग्दर्शन सम्पन्न, मपि मातङ्गदेहजम्।
देवा देवं विदुर्भस्म, गूढ़ाङ्गारान्तरौज-सम्॥२८॥
श्वापि देवोऽपि देवःश्वा, जायते धर्मकिल्विषात्।
काऽपि नाम भवेदन्या, सम्पद्धर्माच्छरीरिणाम्॥२९॥
भयाशास्नेह लोभाच्च, कुदेवागमलिङ्गि नाम्।
प्रणामं विनयं चैव, न कुर्युः शुद्धदृष्टयः॥३०॥
दर्शनं ज्ञानचारित्रात्-साधिमानमुपाश्नुते।
दर्शनं कर्णधारं तन्-मोक्षमार्गे प्रचक्षते॥३१॥

विद्यावृत्तस्य संभूति, स्थिति वृद्धि फलोदयाः।
न सन्त्यसति सम्यक्त्वे, बीजाभावे तरोरिव॥३२॥

गृहस्थो मोक्षमार्गस्थो निर्मोहो नैव मोहवान्।
अनगारो गृही श्रेयान्, निर्मोहो मोहिनो मुनेः॥३३॥

न सम्यक्त्वसमं किञ्चित्, त्रैकाल्ये त्रिजगत्यपि।
श्रेयोऽश्रेयश्च मिथ्यात्व-समं नान्यत्तनूभृताम्॥३४॥

सम्यग्दर्शनशुद्धा, नारकतिर्यङ्नपुंसकस्त्रीत्वानि।
दुष्कुलविकृताल्पायुर्, दरिद्रतां च व्रजन्ति नाप्-यतिकाः॥३५॥

ओजस्तेजोविद्या-, वीर्ययशोवृद्धि विजय विभवसनाथाः।
माहाकुला महार्था, मानवतिलका भवन्ति दर्शनपूताः॥३६॥

अष्टगुण पुष्टि तुष्टा, दृष्टिविशिष्टाः प्रकृष्ट शोभाजुष्टाः।
अमराप्सरसां परषदि, चिरं रमन्ते जिनेन्द्रभक्तः स्वर्गे॥३७॥

नवनिधिसप्तद्वय रत्नाधीशः, सर्व-भूमि पतयश्चक्रम्।
वर्तयितुं प्रभवन्ति, स्पष्टदृशः क्षत्रमौलि शेखर चरणाः॥३८॥

अमरासुरनरपतिभिर्-यमधरपतिभिश्च नूतपादाम्भोजाः।
दृष्ट्या सुनिश्चितार्था, वृषचक्रधरा भवन्ति लोक शरण्याः॥३९॥

शिवमजर मरुजमक्षय, मव्याबाधं विशोकभयशङ्कम्।
काष्ठागतसुख विद्या, विभवं विमलं भजन्ति दर्शनशरणाः॥४०॥

देवेन्द्र चक्रमहिमान ममेयमानम्
राजेन्द्र चक्रमवनीन्द्र शिरोऽर्चनीयम्।
धर्मेन्द्र चक्रमधरीकृत सर्व लोकं,
लब्ध्वा शिवं च जिन भक्तिरुपैति भव्यः ॥४१ ॥

॥ इति प्रथमोऽध्यायः ॥

## अथ द्वितीयोऽध्यायः

अन्यूनमनतिरिक्तं, याथातथ्यं विना च विपरीतात्।
निः सन्देहं वेद, यदाहुस्तज्ज्ञानमागमिनः ॥४२ ॥
प्रथमानुयोगमर्था, ख्यानं चरितं पुराणमपि पुण्यम्।
बोधिसमाधिनिधानं, बोधति बोधः समीचीनः ॥४३ ॥
लोकालोक विभक्तेः, युगपरिवृत्तेश्चतुर्गतीनां च।
आदर्शमिव तथामति रवैति करणानुयोगं च ॥४४ ॥
गृहमेध्-यनगाराणं, चारित्रोत्पत्ति वृद्धिरक्षाङ्गम्।
चरणानुयोगसमयं, सम्यग्ज्ञानं विजानाति ॥४५ ॥
जीवाजीवसुतत्त्वे, पुण्यापुण्ये च बन्धमोक्षौ च।
द्रव्यानुयोगदीपः, श्रुतविद्यालोकमातनुते ॥४६ ॥

॥ इति द्वितीयोऽध्यायः ॥

## अथ तृतीयोऽध्यायः

मोहतिमिरापहरणे, दर्शनलाभादवाप्त-संज्ञानः।
रागद्वेष निवृत्त्यै, चरणं प्रतिपद्यते साधुः॥४७॥
रागद्वेष निवृत्तेर्-हिंसादि निवर्तना कृता भवति।
अनपेक्षितार्थ वृतिः, कः पुरुषः सेवते नृपतीन्॥४८॥
हिंसा-नृतचौर्येभ्यो, मैथुनसेवापरिग्रहाभ्यां च।
पाप प्रणालिकाभ्यो, विरतिः संज्ञस्य चारित्रम्॥४९॥
सकलं विकलं चरणं, तत्सकलं सर्वसङ्ग विरतानाम्।
अनगाराणां विकलं, सागाराणां ससङ्गानाम्॥५०॥
गृहिणां त्रेधा तिष्ठत्यणु गुण शिक्षाव्रतात्मकं चरणम्।
पञ्चत्रिचतुर्भेदं, त्रयं यथासंख्यमाख्यातम्॥५१॥
प्राणातिपातवितथ, व्याहारस्तेय काम मूर्च्छेभ्यः।
स्थूलेभ्यः पापेभ्यो, व्युपरमणमणुव्रतं भवति॥५२॥
संकल्पात्कृतकारित, मननाद्योगत्रयस्य चरसत्वान्।
न हिनस्ति यत्तदाहुः, स्थूलवधाद्विरमणं निपुणाः॥५३॥
छेदनबन्धनपीडन-मतिभारारोपणं व्यतीचाराः।
आहारवारणापि च, स्थूलवधाद् व्युपरतेः पञ्च॥५४॥

स्थूलमलीकं न वदति, न परान् वादयति सत्यमपि विपदे।
यत्तद्वदन्ति सन्तः, स्थूलमृषावाद वैरमणम्॥५५॥
परिवादरहोभ्याख्या, पैशून्यं कूटलेखकरणं च।
न्यासापहारितापि च, व्यतिक्रमाः पञ्च सत्यस्य॥५६॥
निहितं-वा पतितं वा, सुविस्मृतं वा परस्वमविसृष्टम्।
न हरति यन्न च दत्ते, तदकृशचौर्यादुपारमणम्॥५७॥
चौरप्रयोगचौरार्थादान-विलोप सदृश सन्मिश्राः।
हीनाधिक विनिमानं, पञ्चास्तेये व्यतीपाताः॥५८॥
न तु परदारान् गच्छति, न परान् गमयति च पापभीतेर्यत्।
सा परदारनिवृत्तिः, स्वदारसन्तोष नामापि॥५९॥
अन्य विवाहाकरणा-नङ्गक्रीडा विटत्वविपुलतृषाः।
इत्वरिकागमनं चास्मरस्य पंच व्यतीचाराः॥६०॥
धनधान्यादिग्रन्थं, परिमाय ततोऽधिकेषु निस्पृहता।
परिमित-परिग्रहः स्यादिच्छा परिमाण नामापि॥६१॥
अतिवाहनाति संग्रह, विस्मयलोभाति भारवहनानि।
परिमित परिग्रहस्य च, विक्षेपाः पञ्च लक्ष्यन्ते॥६२॥
पञ्चाणुव्रतनिधयो, निरतिक्रमणाः फलन्ति सुरलोकं।
यत्रावधिरष्टगुणा, दिव्यशरीरं च लभ्यन्ते॥६३॥

मातङ्गो धनदेवश्च, वारिषेणस्ततः परः।
नीली जयश्च सम्प्राप्ताः, पूजातिशयमुत्तमम् ॥६४॥
धन श्री सत्यघोषौ च, तापसारक्षकावपि।
उपाख्येयास्तथा श्मश्रु, नवनीतो यथाक्रमम् ॥६५॥
मद्य - मांस - मधु - त्यागैः सहाणुव्रतपञ्चकम्।
अष्टौ मूलगुणानाहुर् - गृहिणां श्रमणोत्तमाः ॥६६॥

॥ इति तृतीयोऽधिकारः ॥

## अथ चतुर्थोऽध्यायः

दिग्व्रतमनर्थ दण्डव्रतं च, भोगोपभोगपरिमाणम्।
अनुबृंहणाद् गुणाना, माख्यान्ति गुणव्रतान्यार्याः ॥६७॥
दिग्वलयं परिगणितं, कृत्वाऽतोऽहं बहिर्न यास्यामि।
इति संकल्पो दिग्व्रत-, मामृत्यणु पाप विनिवृत्यै ॥६८॥
मकराकरसरिदटवी- गिरीजनपद योजनानि मर्यादाः।
प्राहुर्दिशां दशानां, प्रतिसंहारे प्रसिद्धानि ॥६९॥
अवधेर्बहिरणु पाप, प्रति विरते दिंग्व्रतानि धारयताम्।
पञ्चमहाव्रत परिणति, - मणुव्रतानि प्रपद्यन्ते ॥७०॥

प्रत्याख्यानतनुत्वान्-मन्दतराश्चरण मोह परिणामाः।
सत्त्वेन दुरवधारा, महाव्रताय प्रकल्प्यन्ते ॥७१॥
पञ्चानां पापानां-हिंसादीनां मनोवचः कायैः।
कृतकारितानुमोदैस्, त्यागस्तु महाव्रतं महताम्॥७२॥
उर्ध्वाधस्तात्तिर्यग्-व्यतिपाताः क्षेत्र वृद्धिरवधीनाम्।
विस्मरणं दिग्विरते, रत्याशाः पञ्च मन्यन्ते॥७३॥
अभ्यन्तरं दिगवधे रपार्थिकेभ्यः सपापयोगेभ्यः।
विरमणमनर्थदण्ड, - व्रतं विदुर्व्रतधराग्रण्यः॥७४॥
पापोपदेश हिंसादानापध्यान दुःश्रुतीः पञ्च।
प्राहुः प्रमादचर्या, मनर्थदण्डान दण्डधराः॥७५॥
तिर्यक्क्लेशवणिज्या, हिंसारम्भप्रलम्भना दीनाम्।
कथा प्रसङ्गः प्रसवः, स्मर्त्तव्यः पाप - उपदेशः॥७६॥
परशुकृपाणखनित्र ज्वलनायुधश्रृङ्ग श्रृङ्खलादीनाम्।
वधहेतूनां दानं, हिंसादानं ब्रुवन्ति बुधाः॥७७॥
वधबन्धच्छेदादेर् - द्वेषाद्रागाच्च परकलत्रादेः।
आध्यानमपध्यानं, शासति जिनशासने विशदाः॥७८॥
आरम्भसंग साहस-मिथ्यात्वद्वेषरागमदमदनैः।
चेतः कलुषयतां श्रुति-रवधीनां दुःश्रुति र्भवति॥७९॥

क्षितिसलिलदहन पवना-रम्भं, विफलं वनस्पतिच्छेदं।
सरणं सारणमपि च, प्रमादचर्य्यां प्रभाषन्ते ॥८०॥
कन्दर्पं कौत्कुच्यं, मौखर्यमतिप्रसाधनं पञ्च।
असमीक्ष्य चाधिकरणं, व्यतीतयोऽनर्थदण्ड-कृद्विरतेः॥८१॥
अक्षार्थानां परिसं,-ख्यानं भोगोपभोगपरिमाणम्।
अर्थवतामप्यवधौ, रागरतीनां तनूकृतये ॥८२॥
भुक्त्वा परिहातव्यो, भोगो भुक्त्वा पुनश्च भोक्तव्यः।
उपभोगोऽशनवसन, प्रभृति पाञ्चेन्द्रियो विषयः॥८३॥
त्रसहतिपरिहरणार्थं, क्षौद्रं पिशितं प्रमादपरिहृतये।
मद्यं च वर्जनीयं जिनचरणौ शरणमुपयातैः॥८४॥
अल्पफलबहुविघातान्, मूलकमार्द्राणि शृङ्गवेराणि।
नवनीतनिम्बकुसुमं, कैतकमित्येवमवहेयम्॥८५॥
यदनिष्टं तद्व्रतयेद्, यच्चानुपसेव्यमेतदपि जह्यात्।
अभिसन्धिकृता विरतिर्-विषयाद्योग्याद्व्रतं भवति॥८६॥
नियमोयमश्च विहितौ, द्वेधा भोगोपभोगसंहारात्।
नियमः परिमितकालो, यावज्जीवं यमो ध्रियते॥८७॥
भोजन वाहन शयन-स्नानपवित्राङ्गरागकुसुमेषु।
ताम्बूलवसनभूषण, मन्मथसङ्गीतगीतेषु॥८८॥

अद्य दिवा रजनी वा, पक्षो मासस्तथर्तुरयनं वा।
इतिकाल परिच्छित्त्या, प्रत्याख्यानं भवेन्नियमः ॥८९॥
विषयविषतोऽनुपेक्षा-नुस्मृतिरतिलौल्यमतितृषाऽनुभवो।
भोगोपभोगपरिमा-व्यतिक्रमाः पञ्च कथ्यन्ते ॥९०॥

॥ इति चतुर्थोऽध्यायः ॥

## अथ पञ्चमोऽध्यायः

देशावकाशिकं वा, सामायिकं प्रोषधोपवासो वा।
वैयावृत्यं शिक्षा-व्रतानि चत्त्वारि शिष्टानि॥९१॥
देशावकाशिकं स्यात्, कालपरिच्छेदनेन देशस्य।
प्रत्यहमणुव्रतानां, प्रतिसंहारो विशालस्य ॥९२॥
गृहहारिग्रामाणां, क्षेत्रनदीदाव योजनानां च।
देशावकाशिकस्य, स्मरन्ति सीम्नां तपोवृद्धाः॥९३॥
संवत्सरमृतु रयनं, मास-चतुर्मास-पक्ष-मृक्षं च।
देशावकाशिकस्य, प्राहुः कालावधिं प्राज्ञाः॥९४॥
सीमान्तानां परतः, स्थूलेतर पंच पापसंत्यागात्।
देशावकाशिकेन च, महाव्रतानि प्रसाध्यन्ते ॥९५॥
प्रेषणशब्दानयनं, रूपाभिव्यक्तिपुद्गलक्षेपौ।
देशावकाशिकस्य, व्यपदिश्यन्तेऽत्ययाः पञ्च॥९६॥

आसमयमुक्ति मुक्तं, पञ्चाघानामशेषभावेन।
सर्वत्र च सामयिकाः, सामयिकं नाम शंसन्ति॥९७॥
मूर्धरुहमुष्टिवासो-बन्धं पर्य्यंकबन्धनं चापि।
स्थानमुपवेशनं वा, समयं जानन्ति समयज्ञाः॥९८॥
एकान्ते सामयिकं, निर्व्याक्षेपे वनेषु वास्तुषु च।
चैत्यालयेषु वापि च, परिचेतव्यं प्रसन्नधिया॥९९॥
व्यापारवैमनस्याद्विनिवृत्त्यामन्तरात्म विनिवृत्त्या।
सामयिकं बध्नीया, दुपवासे चेकभुक्ते वा॥१००॥
सामयिकं प्रतिदिवसं, यथावदप्यनलसेन चेतव्यं।
व्रतपञ्चकपरिपूरण, कारणमवधानयुक्तेन॥१०१॥
सामयिके सारम्भाः, परिग्रहा नैव सन्ति सर्वेऽपि।
चेलोपसृष्टमुनिरिव, गृही तदा याति यतिभावम्॥१०२॥
शीतोष्णदंशमशक, परिषहमुपसर्गमपि च मौनधराः।
सामयिकं प्रतिपन्ना, अधिकुर्वीरन्नचलयोगाः॥१०३॥
अशरणमशुभमनित्यं, दुःखमनात्मानमावसामि भवम्।
मोक्षस्तद्विपरीतात्-मेति ध्यायन्तु सामयिके॥१०४॥
वाक्कायमानसानां, दुःप्रणिधानान्यनादरस्मरणे।
सामयिकस्यातिगमाः, व्यज्यन्ते पञ्च भावेन॥१०५॥

पर्वण्यष्टम्यां च, ज्ञातव्यः प्रोषधोपवासस्तु।
चतुरभ्यवहार्य्याणां, प्रत्याख्यानं सदेच्छाभिः॥१०६॥
पञ्चानां पापाना-मलंक्रियारम्भगन्धपुष्पाणाम्।
स्नानाञ्जननस्याना-मुपवासे परिहृतिं कुर्य्यात्॥१०७॥
धर्मामृतं सतृष्णः, श्रवणाभ्यां पिवतु पाययेद्वान्यान्।
ज्ञानध्यानपरो वा, भवतूपवसन्नतन्द्रालुः॥१०८॥
चतुराहारविसर्जन, मुपवासः प्रोषधः सकृद्भुक्तिः।
स प्रोषधोपवासो, यदुपोष्यारम्भमाचरति॥१०९॥
ग्रहणविसर्गास्तरणान्-यदृष्टमृष्टान्यनादरास्मरणे।
यत्प्रोषधोपवास, व्यतिलङ्घनपञ्चकं तदिदम्॥११०॥
दानं वैयावृत्यं, धर्माय तपोधनाय गुणनिधये।
अनपेक्षितोपचारो-पक्रियमगृहाय विभवेन॥१११॥
व्यापत्तिव्यपनोदः, पदयोः संवाहनं च गुणरागात्।
वैयावृत्यं यावा-नुपग्रहोऽन्योऽपि संयमिनाम्॥११२॥
नवपुण्यैः प्रतिपत्तिः, सप्तगुणसमाहितेन शुद्धेन।
अपसूनारम्भाणा - मार्याणामिष्यते दानम्॥११३॥

गृहकर्मणापि निचितं, कर्म विमार्ष्टि खलु गृहविमुक्तानाम्।
अतिथीनां प्रतिपूजा, रुधिरमलं धावते वारि॥११४॥
उच्चैर्गोत्रं प्रणतेर्-भोगो दानादुपासनात्पूजा।
भक्तेः सुन्दररूपं, स्तवनात्कीर्तिस्तपोनिधिषुः॥११५॥
क्षितिगत मिव वट बीजं, पात्रगतं दानमल्पमपि काले।
फलतिच्छायाविभवं, बहुफलमिष्टं शरीरभृताम्॥११६॥
आहारौषधयोरप्-युपकरणावासयोश्च दानेन।
वैयावृत्यं ब्रुवते, चतुरात्मत्वेन चतुरस्राः॥११७॥
श्रीषेणवृषभसेने, कौण्डेशः सूकरश्च दृष्टान्ताः।
वैयावृत्यस्यैते, चतुर्विकल्पस्य मन्तव्याः॥११८॥
देवाधिदेवचरणे, परिचरणं सर्वदुःखनिर्हरणम्।
कामदुहि कामदाहिनि, परिचिनुयादादृतो नित्यम्॥११९॥
अर्हच्चरणसपर्या - महानुभावं महात्मनामवदत्।
भेकः प्रमोदमत्ताः, कुसुमेनैकेन राजगृहे ॥१२०॥
हरि-तपिधाननिधाने, ह्यनादरास्मरणमत्सरत्वानि।
वैयावृत्त्यस्यैते, व्यतिक्रमाः पञ्च कथ्यन्ते॥१२१॥

॥ इति पञ्चमोऽध्यायः ॥

## अथ षष्ठोऽध्यायः

उपसर्गे दुर्भिक्षे, जरसि रुजायां च निष्प्रतीकारे।
धर्माय तनुविमोचन-माहुः सल्लेखनामार्याः ॥१२२॥
अन्तःक्रियाधिकरणं, तपः फलं सकलदर्शिनः स्तुवते।
तस्माद्यावद्विभवं, समाधिमरणे प्रयतितव्यम् ॥१२३॥
स्नेहं वैरं सङ्गं, परिग्रहं चापहाय शुद्धमनाः।
स्वजनं परिजनमपि च, क्षान्त्वा क्षमयेत्प्रियैर्वचनैः ॥१२४॥
आलोच्य सर्वमेनः, कृतकारितमनुमतं च निर्व्याजम्।
आरोपयेन्महाव्रत, मामरणस्थायि निश्शेषम् ॥१२५॥
शोकं भयमवसादं, क्लेदं कालुष्यमरतिमपि हित्त्वा।
सत्त्वोत्साहमुदीर्य च, मनः प्रसाद्यं श्रुतैरमृतैः ॥१२६॥
आहारं परिहाप्य, क्रमशः स्निग्धं विवर्द्धयेत्पानम्।
स्निग्धं च हापयित्त्वा, खरपानं पूरयेत्क्रमशः ॥१२७॥
खरपानहापनामपि, कृत्त्वा कृत्त्वोपवासमपि शक्त्या।
पञ्चनमस्कारमनास्-तनुं त्यजेत्सर्वयत्नेन ॥१२८॥
जीवितमरणाशंसे, भयमित्र स्मृति निदान नामानः।
सल्लेखनातिचाराः पञ्च जिनेन्द्रैः समादिष्टाः ॥१२९॥

निःश्रेयसमभ्युदयं, निस्तीरं दुस्तरं सुखाम्बुनिधिम्।
निःपिवति पीतधर्मा, सर्वैर्दुःखैरनालीढः ॥१३०॥
जन्मजरामयमरणैः, शोकैर्दुःखैर्भयैश्च परिमुक्तम्।
निर्वाणं शुद्ध सुखं, निःश्रेयसमिष्यते नित्यम्॥१३१॥
विद्यादर्शनशक्ति-स्वास्थ्यप्रह्लादतृप्तिशुद्धियुजः।
निरतिशयानिरवधयो, निःश्रेयस-मावसन्ति सुखम्॥१३२॥
काले कल्पशतेऽपि च, गते शिवानां न विक्रिया लक्ष्या।
उत्पातोऽपि यदि स्यात्, त्रिलोकसंभ्रान्तिकरण पटुः॥१३३॥
निःश्रेयसमधिपन्नास्-त्रैलोक्य शिखामणिश्रियं दधते।
निष्किट्टिकालिकाच्छवि, चामीकरभासुरात्मानः॥१३४॥
पूजार्थाज्ञैश्वर्यैः, बल परिजन काम भोग भूयिष्ठैः।
अतिशयितभुवनमद्भुत, मभ्युदयं फलति सद्धर्मः॥१३५॥

॥ इति षष्ठोऽध्यायः ॥

## अथ सप्तमोऽध्यायः

श्रावकपदानि देवै-रेकादश देशितानि येषु खलु।
स्वगुणाःपूर्वगुणैः सह, संतिष्ठन्ते क्रम विवृद्धाः॥१३६॥
सम्यग्दर्शनशुद्धः, संसार शरीरभोगनिर्विण्णः।
पञ्च गुरुचरण शरणे, दर्शनिकस्तत्त्वपथ गृह्यः॥१३७॥

निरतिक्रमणमणुव्रत-पञ्चकमपि शीलसप्तकं चापि।
धारयते निःशल्यो, योऽसौ व्रतिनां मतो व्रतिकः ॥१३८॥

चतुरावर्त्तत्रितयश्, चतुः प्रणामःस्थितो यथाजातः।
सामयिको द्विनिषद्यस्-त्रियोगशुद्धिस्त्रिसन्ध्यमभिवन्दी॥१३९॥

पर्वदिनेषु चतुर्ष्वपि, मासे-मासे स्वशक्ति मनिगुह्य।
प्रोषधनियमविधायी, प्रणिधिपरः प्रोषधानशनः ॥१४०॥

मूलफलशाकशाखा, करीरकन्दप्रसूनबीजानि।
नामानि योऽत्ति सोऽयं, सचित्तविरतो दया मूर्तिः ॥१४१॥

अन्नं पानं खाद्यं, लेह्यं नाश्नाति यो विभावर्याम्।
स च रात्रिभुक्ति विरतः, सत्त्वेष्वनुकम्पमानमनाः ॥१४२॥

मल बीजं मलयोनिं, गलन्मलं पूतिगन्धि वीभत्सम्।
पश्यन्नङ्गमनङ्गाद्-विरमति यो ब्रह्मचारी सः ॥१४३॥

सेवाकृषिवाणिज्य, प्रमुखादारम्भतो व्युपारमति।
प्राणातिपातहेतोर्-योऽसावारम्भ वि-निवृत्तः ॥१४४॥

बाह्येषु दशसु वास्तुषु, ममत्वमुत्सृज्य निर्ममत्व-रतः।
स्वस्थः सन्तोषपरः, परिचित्त परिग्रहाद्विरतः ॥१४५॥

अनुमतिरारम्भे वा, परिग्रहे ऐहिकेषु कर्मसु वा।
नास्ति खलु यस्य समधी, रनुमति विरतः स मन्तव्यः॥१४६॥
गृहतो मुनिवनमित्वा, गुरूपकण्ठे व्रतानि परिगृह्य।
भैक्ष्याशनस्तपस्यन्-नुत्कृष्टश्-चेलखण्डधरः॥१४७॥
पापमरातिर्धर्मो, बन्धुर्जीवस्य चेति निश्चिन्वन्।
समयं यदि जानीते, श्रेयो ज्ञाता ध्रुवं भवति॥१४८॥

उपसंहारः

येन स्वयं वीतकलङ्कविद्या, दृष्टि क्रियारत्नकरण्डभावम्।
नीतस्तमायाति पतीच्छयेव, सर्वार्थसिद्धिस्त्रिषु विष्टपेषु॥१४९॥

सुखयतु सुखभूमिः कामिनं कामिनीव,
सुतमिव जननी मां शुद्धशीला भुनक्तु।
कुलमिव गुणभूषा कन्यका संपुनीता-,
ज्जिनपतिपदपद्म प्रेक्षिणी दृष्टि लक्ष्मीः॥१५०॥

॥ इति सप्तमोऽध्यायः ॥

वरं सर्प मुखेवासो, वरं चविषभक्षणम्।
वरं अग्नि जले पातो, मिथ्यात्वेन न जीवितम॥

# ऋषिमण्डल स्तोत्र (संस्कृत)

आद्यंताक्षरसंलक्ष्यमक्षरं व्याप्य यत्स्थितम्।
अग्निज्वालासमं नादं बिन्दुरेखासमन्वितम्।१।
अग्निज्वाला सामाक्रान्तं मनोमल विशोधनं।
दैदीप्यमान हृत्पद्मे तत्पदं नौमि निर्मलं।२। युग्मं।
ॐ नमोऽर्हद्‌भ्यईशेभ्य ॐ सिद्धेभ्यो नमो नमः।
ॐ नमः सर्व सूरिभ्यः उपाध्यायेभ्यः ॐ नमः।३।
ॐ नमः सर्वसाधुभ्यः तत्त्वदृष्टिभ्य ॐ नमः।
ॐ नमः शुद्धबोधेभ्यश्चारित्रेभ्यो नमो नमः।४। युग्मं।
श्रेयसेऽस्तु श्रियस्त्वेतदर्हदाद्यष्टकं शुभं।
स्थानेष्वष्टसु संन्यस्तं पृथग्बीजसमन्वितम्।५।
आद्यं पदं शिरो रक्षेत् परं रक्षतु मस्तकं।
तृतीय रक्षेन्नेत्रे द्वे तुर्यं रक्षेच्च नासिकां।६।
पंचमं तु मुखं रक्षेत् षष्ठं रक्षतु घण्टिकां।
सप्तमं रक्षेन्नाभ्यन्तं पादांतं चाष्टमं पुनः।७। युग्मं।

मंत्र बनाने का विधान

पूर्वं प्रणवतः सांतः सरेफो द्वि-त्रि-पंचषान्।
सप्ताष्टदशसूर्याङ्कान् श्रितो बिन्दुस्वरान् पृथक्।८।

पूज्यनामाक्षराद्यस्तु पंचदर्शनबोधकं।
चारित्रेभ्यो नमो मध्ये ह्रीं सांतसमलंकृतं।९।

ॐ ह्रां ह्रिं ह्रुं ह्रूं ह्रें ह्रैं ह्रों ह्रः असिआउसा सम्यग्दर्शनज्ञानचारित्रेभ्यो ह्रीं नमः।

इति ऋषिमंडलस्तवनस्य यंत्रस्य मूलमंत्रः

आराधकस्यशुभफलदो, नवबीजाक्षरयुतस्तुतः सिद्ध।
अष्टादशशुद्धाक्षर मंत्रोयं जाप्य एव वरभक्त्या ॥१०॥

जंबूवृक्षधरो द्वीपः क्षीरोदधि-समावृतः।
अर्हदाद्यष्टकैरष्ट-काष्ठाधिष्ठैरलंकृतः।१।
तन्मध्ये संगतो मेरुः कूटलक्षैरलंकृतः।
उच्चैरुच्चैस्तरस्तार तारामण्डलमण्डितः।२।
तस्योपरि सकारांतं बीजमध्यास्य सर्वगं।
नमामि बिम्बमार्हंत्यं ललाटस्थं निरंजनं।३। विशेषकं।

अर्हत्परमेश्वर का स्वरूप

अक्षयं निर्मलं शांतं बहुलं जाड्यतोज्झितं।
निरीहं निरहंकारं सारं सारतरं घनं।४।
अनुद्भूतं शुभं स्फीतं सात्त्विकं राजसंमतं।
तामसं विरसं बुद्धं तैजसं शर्वरीसमं।५।

साकारं च निराकारं सरसं विरसं परं।
परापरं परातीतं परं परपरापरं।६।

सकलं निष्कलं तुष्टं निर्भूतं भ्रान्तिवर्जितं।
निरंजनं निराकांक्षं निर्लेपं वीतसंशयं।७।

ब्रह्माणमीश्वरं बुद्धं शुद्धं सिद्धमभंगुरं।
ज्योतीरूपं महादेवं लोकालोकप्रकाशकं।८। कुलकं।

अर्हदाख्यः सर्वर्णान्तः सरेफो बिन्दुमण्डितः।
तुर्यस्वरसमायुक्तो बहुध्यानादिमालितः।९।
एकवर्णं द्विवर्णं च त्रिवर्णंतुर्यवर्णकं।
पंचवर्णं महावर्णं सपरं च परापरं।१०। युग्मं।
अस्मिन्बीजेस्थिताःसर्वेवृषभाद्या जिनोत्तमाः।
वर्णैर्निजैर्निजैर्युक्ता ध्यातव्यास्तत्र संगताः।११।
नादश्चन्द्रसमाकरो बिंदुर्नीलसमप्रभः।
कलारुणसमासांतः स्वर्णाभः सर्वतोमुखः।१२।
शिरः संलीनईकारो विनीलो वर्णतः स्मृतः।
वर्णानुसारिसंलीनं तीर्थकृन्मंडलं नमः।१३। युग्मं।

### तीर्थंकरों की स्थापना

चंद्रप्रभपुष्पदन्तौ, नादस्थितिसमाश्रितौ।
बिंदुमध्यगतौ नेमिसुव्रतौ जिनसत्तमौ।१४।
पद्मप्रभवासुपूज्यौ कलापदमधिश्रितौ।
शिरईस्थितसंलीनौ सुपार्श्वपार्श्वौ जिनोत्तमौ।१५।
शेषास्तीर्थंकराः सर्वे ह्र स्थाने नियोजिताः।
मायाबीजाक्षरं प्राप्ताश्चतुर्विंशतिरर्हतां।१६।
गतरागद्वेषमोहाः सर्वपापविवर्जिताः।
सर्वदा सर्वलोकेषु ते भवंतु जिनोत्तमाः।१७।कलापकं।

### आत्मारक्षा की भावना

देवदेवस्य यच्चक्रं तस्य चक्रस्य या विभाः।
तयाच्छादितसर्वांगं मां मा हिंसन्तु पन्नगाः।१८।
देवदेवस्य यच्चक्रं तस्य चक्रस्य या विभाः।
तयाच्छादितसर्वांगं मां मा हिंसन्तु नागिनीः।१९।
देवदेवस्य यच्चक्रं तस्य चक्रस्य या विभाः।
तयाच्छादितसर्वांगं मां मा हिंसन्तु गोनसाः।२०।
देवदेवस्य यच्चक्रं तस्य चक्रस्य या विभाः।
तयाच्छादितसर्वांगं मां मा हिंसन्तु वृश्चिकाः।२१।

देवदेवस्य यच्चक्रं तस्य चक्रस्य या विभाः।
तयाच्छादितसर्वांगं मां मा हिंसन्तु काकिनी।२२।
देवदेवस्य यच्चक्रं तस्य चक्रस्य या विभाः।
तयाच्छादितसर्वांगं मां मा हिंसन्तु डाकिनी।२३।
देवदेवस्य यच्चक्रं तस्य चक्रस्य या विभाः।
तयाच्छादितसर्वांगं मां मा हिंसन्तु साकिनी।२४।
देवदेवस्य यच्चक्रं तस्य चक्रस्य या विभाः।
तयाच्छादितसर्वांगं मां मा हिंसन्तु राकिनी।२५।
देवदेवस्य यच्चक्रं तस्य चक्रस्य या विभाः।
तयाच्छादितसर्वांगं मां मा हिंसन्तु लाकिनी।२६।
देवदेवस्य यच्चक्रं तस्य चक्रस्य या विभाः।
तयाच्छादितसर्वांगं मां मा हिंसन्तु शाकिनी।२७।
देवदेवस्य यच्चक्रं तस्य चक्रस्य या विभाः।
तयाच्छादितसर्वांगं मां मा हिंसन्तु हाकिनी।२८।
देवदेवस्य यच्चक्रं तस्य चक्रस्य या विभाः।
तयाच्छादितसर्वांगं मां मा हिंसन्तु भैरवाः।२९।
देवदेवस्य यच्चक्रं तस्य चक्रस्य या विभाः।
तयाच्छादितसर्वांगं मां मा हिंसन्तु राक्षसाः।३०।

देवदेवस्य यच्चकं तस्य चक्रस्य या विभाः।
तयाच्छादितसर्वांगं मां मा हिंसन्तु व्यन्तराः।३१।
देवदेवस्य यच्चकं तस्य चक्रस्य या विभाः।
तयाच्छादितसर्वांगं मां मा हिंसन्तु भेकसा।३२।
देवदेवस्य यच्चकं तस्य चक्रस्य या विभाः।
तयाच्छादितसर्वांगं मां मा हिंसन्तु लीनसाः।३३।
देवदेवस्य यच्चकं तस्य चक्रस्य या विभाः।
तयाच्छादितसर्वांगं मां मा हिंसन्तु ते ग्रहाः।३४।
देवदेवस्य यच्चकं तस्य चक्रस्य या विभाः।
तयाच्छादितसर्वांगं मां मा हिंसन्तु तस्कराः।३५।
देवदेवस्य यच्चकं तस्य चक्रस्य या विभाः।
तयाच्छादितसर्वांगं मां मा हिंसन्तु वह्नयः।३६।
देवदेवस्य यच्चकं तस्य चक्रस्य या विभाः।
तयाच्छादितसर्वांगं मां मा हिंसन्तु शृंगिणः।३७।
देवदेवस्य यच्चकं तस्य चक्रस्य या विभाः।
तयाच्छादितसर्वांगं मां मा हिंसन्तु दंष्ट्रिणः।३८।
देवदेवस्य यच्चकं तस्य चक्रस्य या विभाः।
तयाच्छादितसर्वांगं मां मा हिंसन्तु रेलपाः।३९।

देवदेवस्य यच्चकं तस्य चक्रस्य या विभाः।
तयाच्छादितसर्वांगं मां मा हिंसन्तु पक्षिणः ।४०।
देवदेवस्य यच्चकं तस्य चक्रस्य या विभाः।
तयाच्छादितसर्वांगं मां मा हिंसन्तु मुद्गलाः ।४१।
देवदेवस्य यच्चकं तस्य चक्रस्य या विभाः।
तयाच्छादितसर्वांगं मां मा हिंसन्तु जृम्भकाः ।४२।
देवदेवस्य यच्चकं तस्य चक्रस्य या विभाः।
तयाच्छादितसर्वांगं मां मा हिंसन्तु तोयदाः ।४३।
देवदेवस्य यच्चकं तस्य चक्रस्य या विभाः।
तयाच्छादितसर्वांगं मां मा हिंसन्तु सिंहकाः ।४४।
देवदेवस्य यच्चकं तस्य चक्रस्य या विभाः।
तयाच्छादितसर्वांगं मां मा हिंसन्तु शूकराः ।४५।
देवदेवस्य यच्चकं तस्य चक्रस्य या विभाः।
तयाच्छादितसर्वांगं मां मा हिंसन्तु चित्रकाः ।४६।
देवदेवस्य यच्चकं तस्य चक्रस्य या विभाः।
तयाच्छादितसर्वांगं मां मा हिंसन्तु हस्तिनः ।४७।
देवदेवस्य यच्चकं तस्य चक्रस्य या विभाः।
तयाच्छादितसर्वांगं मां मा हिंसन्तु भूमिपाः ।४८।

देवदेवस्य यच्चक्रं तस्य चक्रस्य या विभाः।
तयाच्छादितसर्वांगं मां मा हिंसन्तु शत्रवः।४९।
देवदेवस्य यच्चक्रं तस्य चक्रस्य या विभाः।
तयाच्छादितसर्वांगं मां मा हिंसन्तु ग्रामिणः।५०।
देवदेवस्य यच्चक्रं तस्य चक्रस्य या विभाः।
तयाच्छादितसर्वांगं मां मा हिंसन्तु दुर्जनाः।५१।
देवदेवस्य यच्चक्रं तस्य चक्रस्य या विभाः।
तयाच्छादितसर्वांगं मां मा हिंसन्तु व्याधयः।५२।
देवदेवस्य यच्चक्रं तस्य चक्रस्य या विभाः।
तयाच्छादितसर्वांगं मां मा हिंसन्तु सर्वतः।५३।
श्री गौतमस्य या मुद्रा तस्या या भुवि लब्धयः।
ताभिरभ्यधिकं ज्योतिरर्हः सर्वनिधीश्वरः।५४।
पातालवासिनो देवा देवा भूपीठवासिनः।
स्वःस्वर्गवासिनो देवा सर्वे रक्षंतु मामितः।५५।
येऽवधिलब्धयो ये तु परमावधिलब्धयः।
ते सर्वे मुनयो दिव्या मां संरक्षन्तु सर्वतः।५६।
भवनव्यंतरज्योतिष्ककल्पेंद्रेभ्यो नमो नमः।
ये श्रुतावधयो देशावधयो योगिनामकाः।५७।

परमावधयस्सर्वावधयो ये दिगम्बराः।
बुद्धिऋद्धियुतास्सर्वौषधिऋद्धिश्रिताश्च ये ।५८।
अनंतबलऋद्ध्याप्ता ये तप्ततपसोन्नताः।
रसर्द्धियुंजो विक्रियर्द्धिभाजः क्षेत्रर्धिसंगताः ।५९।
तपः सामर्थ्यसंप्राप्ताक्षीणसद्ममहानसाः।
एतेभ्यो यतिनाथेभ्यो नूतेभ्योपास्तवादिभिः ।६०।
तीर्णजन्मार्णवेभ्यस्सदृगृद्धिचारित्रवाग्भःवैः।
भव्येशेभ्यो भदंतेभ्यो नमोभीष्टपदाप्तये ।६१।
ॐश्रीह्रीकीर्तिधृतिर्लक्ष्मीगौरीचण्डीसरस्वती।
जयाम्बा विजया क्लिन्नाऽजिता नित्या मदद्रवा ।६२।
कामांगा कामवाणा च सानंदा नंदमालिनी।
माया मायाविनी रौद्री कला काली कलिप्रिया ।६३।
एताः सर्वा महादेव्यो वर्तन्ते या जगत्त्रये।
मम सर्वाः प्रयच्छंतु कान्तिं लक्ष्मीं धृतिं मतिं ।६४।
दुर्जनाः भूतवेतालाः पिशाचाः मुद्गलास्तथा।
ते सर्वे उपशाम्यंतु देवदेवप्रभावतः ।६५।
दिव्योगोप्यः सुदुष्प्राप्यः श्रीऋषिमण्डलस्तवः।
भाषितस्तीर्थनाथेन जगत्त्राणकृतोऽनघः ।६६।

रणे राजकुले वह्नौ जले दुर्गे गजे हरौ।
श्मशाने विपिने घोरे स्मृतो रक्षति मानवं।६७।
राज्यभ्रष्टाः निजं राज्यं पदभ्रष्टा निजं पदं।
लक्ष्मीभ्रष्टाः निजं लक्ष्मीं प्राप्नुवन्ति न संशयः।६८।
भार्यार्थी लभते भार्यां पुत्रार्थी लभते सुतं।
धनार्थी लभते वित्तं नरः स्मरण मात्रतः।६९।
स्वर्णेरूप्येऽथवा कांस्येलिखित्वा यस्तु पूजयेत्।
तस्यैवेष्टमहासिद्धिर्गृहे वसति शाश्वती।७०।
भूर्जपत्रे लिखित्वेदं गलके मूर्ध्नि वा भुजे।
धारितः सर्वदा दिव्यं सर्वभीतिविनाशिनं।७१।
भूतैः प्रैतेर्ग्रहैर्यक्षैः पिशाचै मुंद्गलैस्तथा।
वातपित्तकफोद्रेकैर्मुच्यते नात्र संशयः।७२।
भूर्भूवः स्वस्त्रयीपीठवर्तिनः शाश्वता जिनाः।
तैः स्तुतैर्वन्दितैर्दृष्टैर्यत्फलं तत्फलं स्मृतेः।७३।
एतद्गोप्यं महास्तोत्रं न देये यस्य कस्यचित्।
मिथ्यात्ववासिनो देयं बाल-हत्या पदे-पदे।७४।
आचाम्लादितपः कृत्त्वा पूजयित्वा यथाबलं।
अष्टसाहस्त्रिको जाप्यः कार्यस्तत्सिद्धिहेतवे।७५।
शतमष्टोत्तरं प्रातर्ये पठंति दिने-दिने।
तेषां न व्याधयो देहे प्रभवंति च सम्पदः।७६।

अष्टामासावधिंयावत्प्रातःप्रातस्तु यःपठेत्।
स्तोत्रमेतन्महातेज अर्हदेवं स पश्यति ।७७।

दृष्टे सत्यार्हते बिंबे भवे सप्तमके ध्रुवं।
पदं प्राप्नोति विश्रस्तं परमानंदसंपदा ।७८। युग्मं।

विश्ववंद्यो भवेद्ध्याता कल्याणानि च सोश्नुते।
गत्त्वा स्थानं परं सोऽपि भूयस्तु न निवर्तते ।७९।

इदं स्तोत्रं महास्तोत्रं स्तवनामुत्तमं परं।
पठनात्स्मरणाज्जाप्यात् सर्वदोषैर्विमुच्चयते ।८०।

**जाप्य** – ॐ ह्रां ह्रिं ह्रुं ह्रूं ह्रें ह्रैं ह्रौं ह्रः अ सि आ उ सा सम्यग्दर्शन–ज्ञान–चारित्रेभ्यो ह्रीं नमः

॥ इति ऋषि मण्डल स्तोत्रं सम्पूर्णम् ॥

इंदसद वंदियाणं तिहुअण हिद मधुर विसद वक्काणं।
अतातीद गुणाणं णमो जिणाणं जिद भवाणं ॥१॥

सम्मद्दंशण णाणं चरियं तवो अणंत विरियं च।
पञ्चाचार धराणां णमो विशद गुरु आइरियाणं ॥२॥

नमः जिनेशं श्री शांति नाथं, अनन्तसिद्धं सर्वज्ञ देव।
उपसर्ग जेता श्री पार्श्ववीरं, नमो नमः त्व चरणारविन्दं ॥३॥

नमो नमः श्री आचार्य देव, प्रज्ञा श्रमण गुरुवर बालयोगी।
आचार धारी आचार दाता, नमो नमः त्व चरणारविन्दं ॥४॥

# पार्श्वनाथ स्तोत्र

ॐ नमः पार्श्वनाथाय विश्वचिन्तामणियु ते।
ह्रीं धरणेन्द्र वैरोट्या पद्मावती युतायुते ॥१॥

शान्ति तुष्टि महापुष्टि धृति-कीर्ति विद्यापिते।
ॐ ह्रीं दिड्व्याल वेताल, सर्वाधि-व्याधिनाशिने ॥२॥

जया जिताख्या विजयाख्या-ऽपराजितयान्वित।
दिशांपाले ग्रहैर्यक्षेर्विद्यादेवीभि - रन्वित॥३॥

ॐ असिआउसाय नमस्, तत्र त्रैलोक्यनाथताम्।
चतुः षष्ठि सुरेन्द्रास्ते, भासन्ते छत्रचामरै ॥४॥

श्रीशंखेश्वरमण्डन् पार्श्वजिन! प्रणतकल्पतरू।
कल्प चूरय दुष्ट व्रातं, पूरय में वांछित नाथ!॥५॥

***

# जैन रक्षा स्तोत्रम्

श्री जिनंभक्तितोनत्वा, त्रैलोक्याह्लादकारकम्।
जैनरक्षामहं वक्ष्ये, देहिनां देह रक्षकम्॥१॥

ॐ ह्रीं आदीश्वरः पातु, शिरसि सर्वदा मम।
ॐ ह्रीं श्री अजितो देवो, भालं रक्षतु सर्वदा॥२॥

नेत्रयोः रक्षको भूयात्, ॐ आं क्रौं संभवो जिनाः।
रक्षेद् घ्राणेन्द्रिये, ॐ ह्रीं श्रीं क्लीं ब्लूं अभिनन्दनः॥३॥

सुजिह्वे सुमुखे पातु, सुमतिः प्रणवान्वितः।
कर्णयोः पातु ॐ ह्रीं श्रीं रक्तः पद्मप्रभः प्रभुः॥४॥

सुपार्श्वः सप्तमः पातु, ग्रीवामां ह्रीं श्रियाश्रितः।
पातु चन्द्रप्रभः श्रीं ह्रीं क्रों पूर्व स्कन्धयोर्मम॥५॥

सुविधि शीतलो नाथो! रक्षको करपंकजे।
ॐ क्षां क्षीं क्षूं युतौ कामं चिदानन्दमयौ शुभौ॥६॥

श्रेयांसो वासुपूज्यश्च हृदये सदयं सदा।
भूयाद् रक्षाकरो वारं-वारं श्री प्रणवान्वितः॥७॥

विमलोऽनन्तनाथश्च मायाबीज समन्वितौ।
उदरे सुन्दरे शश्वद् रक्षायाः कारकौ मतौ ॥८॥
श्री धर्मशान्तिनाथौ च नाभि पंके रुहे सताम्।
ॐ ह्रीं श्रीं क्लीं हं संयुक्तौ पुनः पातां पुनः-पुनः ॥९॥
श्री कुन्थु-अरनाथौ तु सुगुरु सुकटीतटे।
भवेतामवकौ भूमि ॐ ह्रीं क्लीं सहितौ जिनौ ॥१०॥
मे पातां चारू जंघाया श्री मल्लिमुनिसुव्रतौ।
ॐ ह्रां ह्रीं ह्रूं ततो ह्रः ब्लूं क्लीं श्री युक्तौ कृपाकरौ ॥११॥
यत्नतो रक्षकौ जानू श्री नमिनेमिनाथकौ।
राजराजमती मुक्तौ प्रणवाक्षरपूर्वकौ ॥१२॥
श्री पार्श्वेश महावीरौ पातां मां ह्रौं सुमानदौ।
ॐ ह्रीं श्रीं च तथा भूं क्लीं ह्रां ह्रः श्रां श्रः युतौ जिनौ ॥१३॥
रक्षाकरा यथास्थाने भवन्तु जिननायकाः।
कर्मक्षयकरा ध्याता भीतानां भयवारकाः ॥१४॥
जैन रक्षां लिखित्वेमां मस्तके यस्तु धारयेत्।
रविवद् दीप्यते लोके श्रीमान् विश्वप्रियो भवेत् ॥१५॥

तस्योग्ररोगवेताला: शाकिनी भूतराक्षसाः।
एते दोषा न दृष्यन्ते रक्षकाश्च भवन्त्यमी ॥१६ ॥

अग्निसर्पभयोत्पाता भूपालाश्चोर विग्रहाः।
एते दोषा प्रणश्यन्ति रक्षकाश्च भवन्तयमी ॥१७ ॥

जैन रक्षामिमां भक्त्या प्रातरुत्थाय यः पठेत्।
इच्छितान् लभते कामान् सम्पदश्च पदे-पदे ॥१८ ॥

श्रावणे शुक्लेऽष्टम्यां प्रारम्भ स्तोत्रमुत्तमम्।
अभिषेकं जिनेन्द्राणां कुर्याच्च दिवसाष्टकम्।॥१९ ॥

ब्रह्मचर्यं विधातव्य-मेक भुक्तं तथैव च।
शुचिता शुभ्रवस्त्रेण वालंकारेण शोभनम्।॥२० ॥

नरो वापि तथा नारी शुद्ध भावयुतोऽपि सन्।
दिनं-दिनं तथा कुर्यात् जाप्य सर्वार्थसिद्धये।॥२१ ॥

एकायां तु विधातव्यम् उद्यापन महोत्सवम्।
पूजाविधि समायुक्तं कर्तव्यसज्जनैर्जनै।॥२२ ॥

॥ इति जैन रक्षा स्तोत्रम् ॥

# लघु सहस्त्रनाम स्तोत्र

नमस्त्रैलोक्य-नाथाय, सर्वज्ञाय महातमने।
वक्ष्ये तस्यैव नामानि, मोक्ष-सौख्याभिलाषये॥1॥
निर्मल:शास्वतो शुद्धो, निर्विकारो निरामय:।
नि:शरीरो निरातङ्को, शुद्ध: सूक्ष्मो निरञ्जन:॥2॥
निष्कलङ्को निरालम्बो, निर्ममो निर्मलोत्तम:।
निर्भयो निरहंकारो, निर्विकारो निरुक्तय:॥3॥
निर्दोषो निरुज:शान्तो, निर्भयो निर्मम: शिव:।
निस्तरङ्गो निराकारौ, निकर्मो निकल: प्रभु॥4॥
निर्वादो निरुपज्ञानी निरागो निर्धनो जिन:।
नि:शब्दो प्रतिमाश्रेष्ठो, उत्कृष्टोज्ञान-गोचर:॥5॥
नि:संगो प्राप्त कैवल्यो, नैष्ठिक:शब्द वर्जित:।
अनघो महापूतात्मा, जगत-शिखर-शेखर:॥6॥
नि:शब्दो गुण:सम्पन्न:, पापताप-प्रणाशन:।
सोपयोगो शुभं प्राप्त:, कर्मद्योत-वलावह:॥7॥
अनिंद्यो विश्वनाथश्च, अजो अनुपमो भव:।
अप्रमेयो जगन्नाथ: वोधरूपो जितात्मक:॥9॥
अव्ययो सकलाराध्यो, निष्पन्नो ज्ञानलोचन:।
अछेद्योनिर्मलोऽनित्य:, सर्व-संकल्प वर्जित:॥10॥

अजयो सर्वतोभद्रः, निःकषायो भवान्तकः।
विश्वनाथः स्वयंबुद्ध, वीतरागो जिनेश्वरः ॥11॥
अन्तको सहजानन्द, आवागमन गोचरः।
असाध्य शुद्ध चैतन्यः, कर्मनोकर्म-वर्जितः ॥12॥
अन्तको विमलज्ञानी, निष्पृहो निःप्रकाशकः।
कर्मजित महात्मानम्, लोकत्रय-शिरोमणिः ॥13॥
अव्याबाधो वरः शामी, विश्ववेदी पितामहः।
सर्वभूत-हितोदेवः सर्वलोक-शरण्यकः ॥14॥
अनन्तानन्तधौशक्तिस्-तूताव्यक्तांव्यायात्मकः ॥15॥
अष्टकर्म-विनिर्मुक्तो, सप्तधातु-विवर्जितः।
गारवादयस्त्रयो दूर, सर्वज्ञानादि-संयुतः ॥16॥
अभवः प्राप्त-कैवल्यो, निर्वाणो निरुपेक्षिकः।
निकलो केवलज्ञानी, मुक्तिसौख्य-प्रदायिकः ॥17॥
अनामयो महाराध्यो, वरदो ज्ञान पावनः।
सर्वोशाश्वत सुखावाप्तः, जिनेन्द्रो मुनि संस्तुतः ॥18॥
अणुनः परमज्ञानी, विश्वतत्त्व-प्रकाशकः।
प्रबुद्धो भगवान्नाथ!, प्रशस्त-पुण्यकारकः ॥19॥
शंकरः सुगतो रुद्रः, सर्वज्ञो मदनान्तकः।
ईश्वरो भुवनाधीशो, सचितो पुरुषोत्तमः ॥20॥
सद्योजात महात्मानं, विमुक्तो मुक्तिवल्लभः।
योगीन्द्रोऽनादि संसिद्धो, निरीहो ज्ञानगोचरः ॥21॥

सदाशिवः चतुर्वक्त्र, सत्य सोख्य त्रिपुरान्तकः।
त्रिनेत्रास्त्रिजगत्पूज्यः, अष्टमूर्तिः कल्याणकः ॥22॥
सर्वसाधु जनैर्वंद्यः, सर्वपाप विवर्जितः।
सर्वदेवाधिको देवः, सर्वभूत-हितङ्कर ॥23॥
सर्वसाधु स्वयंवेद्यो, प्रसिद्धो पापनाशनः।
चिन्मात्रः चिंदानन्दः, चैतन्यो चैतवैभवः ॥24॥
सकलातिशयो देवः, मुक्तिस्थो महतामहः।
मुक्ति कार्याय सन्तुष्टो, निरागो परमेश्वरः ॥25॥
महादेवो महावीरो, महा-मोह-विनाशकः।
महाभावो महादासीः, महामुक्ति प्रदायकः ॥26॥
महाज्ञानी महायोगी, महातपो महात्मयः।
महाधिको महावीर्यो, महापतिः पदस्थितः ॥27॥
महापूज्यो महावन्द्यौ, महाविघ्न-विनाशकः।
महासौख्यो महापुंसो, महामोहमदच्युतः ॥28॥
मुक्तामुक्तिर्निरोधी च, एकानैक विनिश्चलः।
सर्वदः-विनिर्मुक्तो, सर्वलोक आराधकः ॥29॥
महासूरो महाधीरो, महादुःख विनाशकः।
महामुक्तो महावीरो, महाहृदो महागुरुः ॥30॥
निर्मोही मारविध्वंसी, निष्कामो विषयच्युतः।
भगवन्तो गतभ्रान्तो, शान्ति कल्याणकारकः ॥31॥

परमात्माऽपरमज्योतिः, परमेष्ठी परमेश्वरः।
परमात्मा परमानन्द, परः परम आत्मकः ॥32॥
भूतानंद विज्ञानः, साक्षात् निर्वाण संस्तुतः।
नाकृतिर्नाक्षरोऽवर्णोः, व्योमरूपौ जितात्मकः ॥33॥
व्याक्ताव्यक्त-रसद्बोधः, संसारच्छेदकारकः।
नरवन्द्यो महाराध्य, कर्मजित धर्मनायकः ॥34॥
बोधयन्-सुजगद्वन्द्यो, विश्वात्मानरकांतक।
स्वयम्भू भव्यपूज्यात्मा, पुनीतोविभवस्तुतः ॥35॥
वर्णातीतो महातीतो, रूपातीतो निरंजनः।
अनन्तज्ञान सम्पन्नः, देवदेवो! सनायकः ॥36॥
वरेण्य भवबिध्वंशी, योगिनां ज्ञानगोचरः।
जन्ममृत्युजरातंको, सर्वविघ्नहरो हराः ॥37॥
विश्वदृक् भव्यसम्बन्ध, पवित्रो गुणसागरः।
प्रसन्नः परमाराध्यो, लोकालोक प्रकाशकः ॥38॥
रत्नगर्भो जगत्स्वामी, इन्द्रवन्द्य सुरार्चितः।
निःप्रपंचो निरातंको, निःशेष क्लेशनाशकः ॥39॥
लोकेशो लोक संसेव्यो, लोकालोक प्रकाशकः।
लोकोत्तमो नृलोकेशो, लोकाग्रशिखर स्थितः ॥40॥
नामाष्टक सहस्राणि, ये पठन्ति पुनः-पुनः।
ते निर्वाणपदयांति, मुच्यन्ते नात्र संशयः ॥41॥

~~~
~~~

# श्रीपार्श्वनाथस्तोत्रम्

अजर-ममर-सारं मार-दुर्वार-वारं,
गलित-बहुलखेदं सर्वतत्त्वानुवेदम्।
कमठ-मदविदारं भूरिसिद्धान्तसारं,
विगतवृजिनयूथं नौम्यहं पार्श्वनाथम्॥१॥
प्रहतमदनचापं केवलज्ञानरूपं,
मरकतमणिदेहं सौम्यभावानुगेहम्।
सुचरितगुणपूरं पञ्चसंसारदूरं,
विगतवृजिनयूथं नौम्यहं पार्श्वनाथम्॥२॥
सकल-सुजनभूपं धौतनिःशेषतापं,
भवगहनकुठारं सर्वदुःखापहारम्।
अतुलित-तनुकाशं घात्यघातिप्रणाशं,
विगतवृजिनयूथं नौम्यहं पार्श्वनाथम्॥३॥
असदृशमहिमानं पूज्यमानं नमानं,
त्रिभुवनजनतेशं क्लेशवल्लीहुताशम्।
धृतसुमनसमीशं शुद्धबोधप्रकाशं,
विगतवृजिनयूथं नौम्यहं पार्श्वनाथम्॥४॥
गतमदकरमोहं दिव्यनिर्घोषवाहं,
विघ्ततिमिरजालं मोहमल्लप्रमल्लम्।

विलसद-मल-कायं मुक्तिसामस्त्यगेहं,
विगतवृजिनयूथं नौम्यहं पार्श्वनाथम् ॥५॥
सुभगवृषभराजं योगिनां ध्यानपुञ्जं,
त्रुटितजननबन्धं साधुलोकप्रबोधम्।
सपदि गलितमोहं भ्रान्तमेधाविपक्षं,
विगतवृजिनयूथं नौम्यहं पार्श्वनाथम् ॥६॥
अनुपम-मुखमूर्तिं प्रातिहार्याष्टपूर्तिं,
खचरनरसुतोषं पञ्चकल्याणकोषम्।
धृतफणिमणिदीपं सर्वजीवानुकम्पं,
विगतवृजिनयूथं नौम्यहं पार्श्वनाथम् ॥७॥
अमरगुणनृपालं किन्नरीनादशालं,
फणिपतिकृतसेवं देवराजाधिदेवम्।
असम-बल-निवासं मुक्तिकान्ता-विलासं,
विगतवृजिनयूथं नौम्यहं पार्श्वनाथम् ॥८॥
मदन-मदहरश्री-वीरसेनस्य शिष्यैः,
सुभग-वचन-पूरैः राजसेनैः प्रणीतम्।
जपति पठति नित्यं पार्श्वनाथाष्टकं यः,
स भवति शिवभूपो मुक्तिसीमन्तिनीशः ॥९॥

# मंगल गोचर माध्याह्न क्रिया विधि

त्रयोदशी को वर्षायोग प्रतिष्ठापन निष्ठापन के अवसर पर मंगल गोचर माध्याह्न देव वंदना क्रिया में सिद्धभक्ति, चैत्यभक्ति, पञ्चमहागुरुभक्ति, शांतिभक्ति, समाधिभक्ति पढ़ना चाहिये तथा मंगल गोचर भक्त प्रत्याख्यान क्रिया विधि के अंतर्गत आचार्य श्री के समक्ष सिद्धभक्ति, वृहदयोगभक्ति, शांतिभक्ति, समाधिभक्ति करना चाहिये।

## वर्षायोग धारण समापन क्रिया विधि

चतुर्दशी को उपवासपूर्वक वार्षिक प्रतिक्रमण करें। वर्षायोग धारण समापन विधि के अंतर्गत सिद्ध भक्ति, योग भक्ति के साथ **पूर्व दिशा में** –

**यावन्ति जिन चैत्यानि विद्यन्ते भुवनत्रेय।**
**तावन्ति सततं भक्तया त्रिः परीत्य नमाम्यहम्॥**

और ऋषभ अजितनाथ स्तवन पेज नं. 77–78 पर देखें। पश्चात् 'लघु चैत्यभक्ति' पढ़ना चाहिये। **पूर्व दिशा में अरहंत सिद्ध आचार्य उपाध्याय, साधु, जिनधर्म जिनागम जिनचैत्य, जिनचैत्यालय** को मेरा बारंबार नमोस्तु (पीले सरसों या पुष्प छोड़े।)

दक्षिण दिशा में –

**यावन्ति जिन चैत्यानि विद्यन्ते भुवनत्रेय।**
**तावन्ति सततं भक्तया त्रिः परीत्य नमाम्यहम्॥**

संभवनाथ अभिनन्दन नाथ स्तवन पेज नं. 78, 79 पर पढें। पश्चात् लघु चैत्य भक्ति पढ़ना चाहिए, दक्षिण दिशा में स्थित अरहन्त, सिद्ध आर्चाय उपाध्याय सर्च साधु जिनआगम, जिन चैत्य, जिनचैत्यालय के लिए बारम्बार नमस्कार[3] हो (पीली सरसों छोड़े)

पश्चिम दिशा में –

**यावन्ति जिन चैत्यानि विद्यन्ते भुवनत्रेय।**
**तावन्ति सततं भक्तया त्रिः परीत्य नमाम्यहम्॥**

सुमतिनाथ, पदप्रभु नाथ स्तवन पेज नं. 81, 82 पर पढ़े पश्चात् लघु चैत्य भक्ति पढ़ना चाहिए, दक्षिण दिशा में स्थित अरहन्त् सिद्ध, आर्चाय, उपाध्याय, साधु, जिन धर्म, जिनागम, जिनचैत्य, जिन चैत्यालय के लिए मेरा बारम्बार नमस्कार[3] हो। (पीली सरसों छोड़े)

उत्तर दिशा में –

**यावन्ति जिन चैत्यानि विद्यन्ते भुवनत्रेय।**
**तावन्ति सततं भक्तया त्रिः परीत्य नमाम्यहम्॥**

सुपार्श्वनाथ, चन्द्रप्रभु नाथ स्तवन पेज नं. 82, 83 पर पढ़े पश्चात् लघु चैत्यभक्ति पढ़ना चाहिए, उत्तर दिशा में स्थित अरहन्त् सिद्ध, आर्चाय, उपाध्याय, सर्वसाधु, जिनधर्म, जिनागम, जिनचैत्य, जिन चैत्यालय के लिए मेरा बारम्बार नमस्कार[3] हो। (पीली सरसों छोड़े)

अन्त में पञ्चमहागुरु भक्ति, शान्ति भक्ति समाधि भक्ति पढ़े